THE

# KÂṆÂDASIDDHÂNTACHANDRIKÂ

OF

## GANGÂDHARASÚRI

EDITED

BY

## T GAṆAPATI SÂSTRÎ

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF
HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM

# काणादसिद्धान्तचन्द्रिका

गङ्गाधरसूरिप्रणीता

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

त. गणपतिशास्त्रिणा

संशोधिता ।

---

सा च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये

मुद्रयित्वा प्रकाशिता ।

---

कोलम्बाब्दाः १०८८, क्रैस्ताब्दाः १९१३.

# निवेदना ।

---

काणादसिद्धान्तचन्द्रिकायामस्यां कणादमुनेः सिद्धान्ता व्युत्पित्सुसुगमया भङ्ग्या प्रकाश्यन्ते । अस्याः प्रणेत्रा गङ्गाधरसूरिणा प्रसादाभिधानं व्याख्यानमप्येतस्या निर्मितमस्तीति श्रूयते । एष गङ्गाधरसूरिः कुवलयानन्दव्याख्याया रसिकरञ्जन्याः कर्तुर्गङ्गाधराध्वरीन्द्रान्न भिन्नः, द्वयोरपि विश्वरूपयतिशिष्यतावगमात्* ।

रसिकरञ्जन्याम् —

'अस्मत्पितामहसहोदरदेशिकेन्द्रमप्पय्ययज्वतिलकं प्रणमामि मूर्ध्ना'

इति अप्पय्यदीक्षितान् स्वपितामहभ्रातुराचार्यान् वदन् गङ्गाधरसूरिरप्पय्यदीक्षितासन्नकालतामात्मनः सूचितवान् । स चायमप्पय्यदीक्षितशिष्यपौत्रस्य गङ्गाधरसूरेः काल औचित्यादप्पय्यदीक्षितभ्रातृपौत्रस्य नीलकण्ठदीक्षितस्य कालेन‡

---

* "वटस्य पत्रे मूले च स्थितिर्येषां विकल्प्यते ।
सूरिभिस्तान् गुरून् वन्दे विश्वरूपेन्द्रयोगिनः ॥" (काणाद. पृ ६२)

"यत्पादपङ्कजरजःकणिकानुरक्त-
मागाश्च देवगुरुमप्यधरीकरोति ।
मूकोऽपि स पशुपतेरपरावतार-
श्रीविश्वरूपयमिनं गुरुमानतोऽस्मि ॥" (रसिकरञ्जनी पृ. १)

‡ ग्रन्थाद्यगप्रदशशतकलक्षणेन ।

समान सम्भाव्यते । अस्या संशोधनाधारभूता ग्रन्थास्तु —

१. (वेङ्का) परमेश्वरसूत्तसम्बन्धी क. सञ्ज्ञ

२ पन्तलराजसम्बन्धी ख सञ्ज्ञ

३ वेळप्परम्बु चित्रनम्पूतिरिसकाशादधिगतो ग सञ्ज्ञ

अनन्तशयनम् त गणपतिशास्त्री

॥ श्रीः ॥

गङ्गाधरसूरिकृता

# काणादसिद्धान्तचन्द्रिका ।

---

## उद्देशग्रन्थः ।

---

नत्वा विशुद्धविज्ञानं दक्षिणामूर्तिमीश्वरम् ।
कुर्वे काणादसिद्धान्तचन्द्रिकां बुधतुष्टये ॥

इह हि पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानमपवर्गहेतुरिति पदार्थतत्त्वं निरूप्यते । प्रमाविषयः पदार्थः । स च द्विविधः, भावोऽभावश्चेति । तत्र भावो द्रव्यगुणकर्मसामान्यविशेषसमवायभेदात् षड्विधः । तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनोभेदेन नव । सुवर्णस्य तेजस्यन्तर्भावो वक्ष्यते । अन्धकारस्तु न द्रव्यं, तत्प्रतीतेः क्लृप्तालोकाभावेनैवोपपत्तेः । रूपवत्त्वप्रतीतिश्च तस्मिन् भ्रम एव । चलनादिप्रतीतिरपि तस्मिन्नालोकगमनाद्यौपाधिकी भ्रान्तिरेव । विस्तरस्त्वाकरे । नातो विभागव्याघातः । द्रव्यलक्षणं तु भावकार्यसमवायिकारणत्वं द्रव्यत्वजातिमत्त्वं वा । गुणास्तु रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाश्चतुर्विंशतिरिति कणाद

---

१. 'त्व' क. ग. पाठः. २. 'तोऽपि वि' ख. पाठः.

गौतममुनिमतानुसारिणः प्राञ्चः । परत्वापरत्वपृथक्त्वगुरुत्वानां निरसिष्यमाणतया विंशतिरेव गुणा इति नव्याः । विभागस्यापि निरासादेकोनविंशतिरिति नव्यतराः । सङ्ख्याया अपि व्युदासादष्टादशेति नव्यतमाः । संस्कारपरिमाणयोरपि तिरस्कारात् षोडशैव गुणा इति स्वतन्त्राः । धर्माधर्मयोरपि प्रतिक्षेपाच्चतुर्दशेत्यतिस्वतन्त्राः । सर्वं चेदं गुणनिरूपणावसरे निरूपयिष्यते । उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनभेदात् पञ्च कर्माणि । भ्रमणरेचनस्यन्दनोर्ध्वज्वलनतिर्यग्गमनादिकं गमनविशेष एवेति न तेषां पार्थक्यमिति सिद्धान्तः । उत्क्षेपणादेरपि गमनविशेषतया पृथग्भावाभावाद् गमनमेवैकं कर्मेति स्वतन्त्राः । सामान्यं द्विविधं, जातिरुपाधिश्चेति । जातिरपि द्विविधा, परापरभेदात् । तत्र सर्वजात्यपेक्षया अधिकदेशवृत्तिः परा । यथा सत्ता । सा हि द्रव्यत्वाद्यपेक्षयाधिकदेशवृत्तिः । द्रव्यत्वगुणत्वादिकं हि द्रव्यगुणादिमात्रवृत्ति । सत्ता तु द्रव्यगुणकर्मसु त्रिष्वपि वर्तत इति सा परा । द्रव्यत्वादिकं तु अपरा जातिः, सत्तापेक्षया अल्पदेशवृत्तित्वात् । उपाधिरपि द्वेधा, सखण्डोऽखण्डश्च । तत्र नानापदार्थघटितधर्मः सखण्डः । यथा इन्द्रियत्वादयः । तदघटितोऽखण्डः । यथा अभावत्वादयः । अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः । नित्यद्रव्येषु पार्थिवादिषु परमाणुषु विभुषु च गगनादिषु मनसि च व्यावर्तकः स्वस्मिन् व्यावर्तकधर्मान्तरशून्यः कश्चिद् धर्मोऽभ्युपेयः । अन्यथा तेषां परस्परव्यावृत्तेरसिद्धेरिति सिद्धान्तः ।

---

१. 'व्याप्ति' ग. पाठ. २. 'सखण्डोऽखण्डश्च' ख. ग. पाठः.

अतिरिक्तविशेषाभ्युपगमे तेषां परस्परव्यावर्तकधर्मान्तराभ्युपगमे अनवस्थापत्तेः स्वत एव तस्य व्यावृत्तिर्वक्तव्या । तथाच नित्य-द्रव्याणामेव स्वतो व्यावृत्तिसम्भवादतिरिक्तविशेषाङ्गीकारो मुधेति नव्याः । नित्यः सम्बन्धः समवायः । स चावयवावयविनोर्गुणगुणिनोः क्रियाक्रियावतोर्जातिव्यक्त्योर्विशेषनित्यद्रव्ययोश्च सम्बन्धः । स च सर्वत्रैक एवेति प्राञ्चः । प्रतिद्रव्यं तत्तद्रव्य-समवेतानामेक इति नव्याः । संयोगवदयमप्यनित्य इति प्राभाकराः । अभावो द्विविधः, संसर्गाभावोऽन्योन्याभावश्चेति । तत्र संसर्गाभावस्त्रिविधः, प्रागभावप्रध्वंसाभावात्यन्ताभावभेदात् । संसर्गाभावत्वं चान्योन्याभावभिन्नाभावत्वम् । अन्योन्याभावत्वं च तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम् । तत्र घटो भविष्यतीति प्रतीतिसाक्षिको विनाशी अभावः प्रागभाव इति प्राञ्चः । नास्त्येव प्रागभाव इति नव्या वेदान्तिनश्च । घटो नश्यतीति प्रतीतिसाक्षिक उत्पत्तिमानभावः प्रध्वंसाभावः । वेदान्तिनस्तु सर्वकार्यस्य चरमक्षणसम्बन्ध एव ध्वंस इति प्राहुः । विस्तरस्तु मीमांसासाम्राज्ये गुरुचरणैः कृतस्तत्रैव द्रष्टव्यः । अनादिरनन्त इदमिह नास्तीति प्रतीतिसाक्षिकः संसर्गाभावोऽत्यन्ताभावः । इदमिदं नेति प्रतीतिसाक्षिकोऽन्योन्याभावः । अत्र हि तादात्म्यसम्बन्धः प्रतियोगितावच्छेदक इति व्यवहरन्ति। तथाहि— घटः पटो न भवतीति घटे पटतादात्म्यं प्रसज्य पश्चात् पटो निषिध्यते । येन सम्बन्धेन प्रतियोगी निषि-

१. 'स्य परस्परव्या' ग. पाठः. २. 'न च स' ख. पाठः.

ध्यते, स सम्बन्धः प्रतियोगितावच्छेदकसम्बन्धः । अत एव भूतले घटो नास्तीत्यादौ संयोगसम्बन्धेन भूतले घटो निषिध्यत इति भूतलवृत्तिघटात्यन्ताभावप्रतियोगितावच्छेदकसम्बन्धः संयोगः ॥

इत्युद्देशग्रन्थः ।

---

अथ साधर्म्यवैधर्म्यप्रक्रिया ।

सप्तानामपि पदार्थानां साधर्म्यं ज्ञानविषयत्ववस्तुत्वादि । द्रव्यादीनां पञ्चानां भावत्वे सत्यनेकत्वम् । समवायस्य भावत्वेऽपि नानेकत्वम् । अभावस्यानेकत्वेऽपि न भावत्वम् । सामान्यादीनां चतुर्णां जातिशून्यत्वम् । द्रव्यादीनां त्रयाणां सत्तावत्त्वजातिमत्त्वे । गुणादीनां षण्णां निर्गुणत्वं द्रव्यान्यत्वं च । समवायिकारणत्वं द्रव्याणाम् । गुणकर्मणोरेवासमवायिकारणत्वम् । ननु किमिदं कारणत्वम् । उच्यते । अन्यथासिद्धिशून्यत्वे सति नियतपूर्ववर्तित्वम् । यथा पटं प्रति तन्त्वादेः । नियतपूर्ववर्तित्वमात्रं तत्पटव्यक्तिं प्रति रासभादेरप्यस्ति यद्यपि, तथापि तस्यान्यथासिद्धत्वान्न तत्पटव्यक्तिं प्रति कारणत्वम् । अन्यथासिद्धिस्तु अवश्यकल्प्यनियतपूर्ववर्तिन एव कार्यसम्भवे तत्सहभूतत्वम् । यथा पटं प्रति रासभादेः । पटान्तरेऽवश्यकल्प्यनियतपूर्ववर्तिताकैस्तन्त्वादिभिरेव पटव्यक्तेरपि सम्भवे रासभो न

---

१. 'र्यस्य स' ख पाठ.

कारणमिति । तच्च कारणं त्रिविधं, समवायिकारणत्वासमवायिकारणत्वनिमित्तकारणत्वभेदात् । तत्र समवायेन कार्याधारत्वमाद्यम् । यथा पटं प्रति तन्त्वोः । तन्तौ हि पटः समवायसम्बन्धेन वर्तते, न वेमादिषु । अतो भवति पटं प्रति तन्तुः समवायिकारणम् । कार्यैकार्थकारणैकार्थान्यतरप्रत्यासत्त्या कार्यजनकत्वं द्वितीयम् । यथा पटं प्रति तन्तुसंयोगस्य । तस्य हि कार्येण पटेन सह एकस्मिंस्तन्तुरूपेऽर्थे प्रत्यासत्तिर्विद्यते । अतः कार्यैकार्थप्रत्यासत्त्या पटजनकत्वात् पटं प्रत्यसमवायिकारणं तन्तुसंयोगः । यथा वा पटरूपं प्रति तन्तुरूपस्य । तस्य पटरूपकारणेन पटेन सहैकस्मिंस्तन्तुरूपेऽर्थे प्रत्यासत्तिरस्ति । अतस्तया प्रत्यासत्त्या पटरूपजनकत्वात् तन्तुरूपं पटगतरूपं प्रत्यसमवायिकारणम् । एतदुभयभिन्नत्वे सति कारणत्वं निमित्तत्वम् । यथा पटं प्रति तुरीवेमादेः । भावकार्य एवास्य त्रिविधकारणस्यापेक्षा । अभावस्य तु निमित्तमात्रापेक्षैव । तस्य क्वचिदप्यसमवायेनाद्यद्वयासम्भवादिति प्राञ्चः । नव्यास्तु भावकार्येऽपि न त्रिविधकारणापेक्षानियमः, क्वचिदसमवायिकारणाभावेऽपि कार्योत्पत्तिसम्भवादित्याहुः । अणुपरिमाणभिन्नानां कारणत्वम् । नवानामपि द्रव्याणां गुणाश्रयत्वम् । नित्यद्रव्यभिन्नानां वृत्तिमत्त्वम् । गगनादीनां पञ्चानां द्रव्यानारम्भकद्रव्यत्वं स्पर्शशून्यद्रव्यत्वं च । पृथिव्यादीनां चतुर्णां स्पर्शवत्त्वद्रव्यारम्भकत्वे । पृथिव्यादिगगनान्तानां भूतत्वम् । तच्च बहिरिन्द्रिय-

---

१. 'क्षित्यार्दौ' ख पाठः.

ग्राह्यविशेषगुणवत्त्वम् । रूपरसगन्धस्पर्शशब्दा हि पृथिव्यादीनां विशेषगुणाः । ते च चक्षुरादिभिर्बहिरिन्द्रियैर्ग्रहीतुं योग्याः। गगनपरित्यागेन मनःसहितानामेषां मूर्तत्वक्रियावत्त्ववेगवत्त्वानि । मूर्तत्वं चापकृष्टपरिमाणवत्त्वम् । गगनादीनामात्मान्तानां सर्वमूर्तद्रव्यसंयोगित्वपरममहत्त्वे । आकाशात्मनोरव्याप्यवृत्तिविशेषगुणवत्त्वम् । आकाशस्य विशेषगुणः शब्दः। स च विभौ तस्मिन् न सर्वप्रदेशे जायते, भेरीमृदङ्गादिप्रदेशं विहायान्यत्रानुपलम्भात् । एवमात्मन्यपि विभौ ज्ञानादिर्विशेषगुणो न सर्वत्रोत्पद्यते, किन्तु शरीराद्यवच्छेदेनेति भवति ज्ञानादिरव्याप्यवृत्तिः । दिक्कालमनसां विशेषगुणानाश्रयद्रव्यत्वम् । दिक्कालयोः सर्वोत्पत्तिमन्निमित्तद्रव्यत्वम् । पृथिवीजलयोर्गुरुत्वरसवत्त्वे । पृथिवीतेजसोर्नैमित्तिकद्रवत्वम् । महीपवनयोरनुष्णाशीतस्पर्शवत्त्वमित्यादि । केवलान्वयिधर्मं विहाय यस्य यत् साधर्म्यं, तत् तदितरस्य वैधर्म्यम् । केवलान्वयिधर्मस्य तु न वैधर्म्यं[†], प्रपञ्चमात्रस्यापि प्रमेयत्वाद् वस्तुत्वाच्च ।

इति साधर्म्यवैधर्म्यप्रक्रिया ।

---

अथ द्रव्यनिरूपणम् ।

अथेदानीं क्षित्यादीनि द्रव्याणि प्रत्येकं निरूप्यन्ते । तत्र गन्धवती पृथिवी । शुक्लनीललोहितहरितपीतादिभेदेन

---

† विरुद्धो धर्मो विधर्मः, तस्य भाव इति विग्रहो बोध्यः ।

नानारूपं पृथिव्यामेव । मधुरतिक्तकटुकषायाम्ललवणभेदेन षड्विधो रसस्तस्यामेव । स्पर्शो ह्यस्यामनुष्णाशीतः । सर्वे चैते रूपादयोऽस्यां‡ पाकजाः । सा च नित्यानित्यभेदाद् द्विविधा । नित्या परमाणुरूपा । न च तस्यां मानाभावः । यथा हि महत्परिमाणतारतम्यं गगनादौ विश्रान्तं, तथा अणुपरिमाणतारतम्यस्यापि क्वचिद् विश्रान्तिर्वक्तव्या । यत्र च विश्रमस्तस्यानित्यत्वे अनन्तावयवारब्धत्वाविशेषेण मेरुसर्षपयोस्तुल्यपरिमाणत्वप्रसङ्गाद् नित्यत्वं वाच्यम् । स एव परमाणुः । न च जालमार्गप्रविष्टसौरालोकान्तरुपलभ्यमाने त्रुटिशब्दिते रजस्येव विश्रमोऽस्त्विति वाच्यम् । यत्र ह्यणुपरिमाणतारतम्यं विश्रान्तं, तन्नित्यमित्युक्तम् । न च त्रुटेर्नित्यत्वं सम्भवति । स हि चक्षुषा गृह्यते । अतो घटादिवच्चाक्षुषद्रव्यत्वादयमपि सावयवः । एवं त्रुटेः सावयवत्वे सिद्धे तदवयवानां द्व्यणुकसंज्ञानां कपालवन्महदारम्भकत्वेन सावयवत्वम् । तदवयवास्तु न सावयवाः, मानाभावाद् अनवस्थापत्तेश्चेति न्यायवैशेषिकवृद्धाः । नवीनाः पुनस्त्रुटेरेव नित्यतां स्वीकृत्य परमाणुं प्रत्याचख्युः । अनित्या च द्व्यणुकादिरूपा पृथिवी । सैवावयवसमवेतेत्युच्यते । ननु अवयवातिरिक्तेऽवयविनि किं प्रमाणं, घटादिव्यवहारस्य परमाणुपुञ्जैरेवोपपत्तेरिति चेद्, न । तेषां बहुत्वेन महत्त्वाभावेन च एको महान् घट इत्यादिव्यवहारानापत्तेरिति संक्षेपः । अनित्यापि

१. 'या स' ग. पाठः।

‡ अस्यामेवेत्यर्थः । तेन घटादिगतरूपादीनामपाकजत्वेऽपि न क्षतिः ।

त्रिविधा शरीरेन्द्रियविषयभेदात्। तत्र च, शरीरं योनिजायोनिजभेदेन द्विविधम्। योनिजं जरायुजाण्ड(जादि?ज)भेदेन द्विविधम्। तत्र जरायुजं मनुष्यादीनाम्। अण्डजं सरीसृपादीनाम्। अयोनिजं स्वेदजोद्भिज्जादिकम्। स्वेदजा मशकमत्कुणादयः। उद्भिदस्तरुगुल्मादयः। शरीरत्वं तु चेष्टावत्त्वे सत्यन्त्यावयवित्वम्। चेष्टावत्त्वमात्रं हस्तादाववयवेऽतिप्रसक्तम्। अतो विशेष्यदलम्। चेष्टा च हिताहितप्राप्तिपरिहारानुकूला क्रिया, न तु स्पन्दमात्रम्। अतो नातिप्रसङ्गः। इन्द्रियं गन्धग्राहकं घ्राणम्। विषयो द्व्यणुकादिमहापृथिव्यन्तः। उपभोगसाधनं विषय इत्युच्यते। यच्च कार्यं यददृष्टाधीनं तत् तस्योपभोगं साक्षात् परम्परया वा साधयति। नहि बीजप्रयोजनाभ्यां[२] विना कस्यचित् सम्भवोऽस्ति। शरीरेन्द्रिययोरेतदन्तःपातेऽपि पृथगुपदेशः शिष्यबुद्धिवैशद्यार्थः।

जलत्वजातिमज्जलम्। तच्च शीतस्पर्शाश्रयः। स्नेहस्तु तस्मिन्नेव। शुक्लमेव रूपम्। न च कालिन्दीजलादौ नीलरूपोपलम्भादयुक्तमिदमिति वाच्यम्। पृथिव्या एव नीलरूपसमवायितया जले तदसंभवात्। तत्र नीलत्वप्रतीतेराश्रयोपाधिकत्वात्। अत एव कालिन्दीजलस्य वियति विक्षेपे सति धवलिमोपलभ्यते। मधुर एव रसस्तत्र। न च जले रस एव नोपलभ्यते, प्रत्युत जम्बीरजलादावन्यरस एवोपलभ्यत इति वाच्यम्। व्यञ्जकाभावदशायां तत्र रसानुपलम्भेऽपि आम-

---

१ 'स्ता' क पाठ. २ 'कारणत्र' क पाठ. ३. 'रूप' क पाठ.

लकीहरीतक्यादिभक्षणरूपव्यञ्जकसमवधाने तत्र मधुररसस्योपलभ्यमानस्य प्रत्याख्यानायोगात् । जम्बीरनीरादौ रसान्तरोपलम्भ आश्रयौपाधिकी[1] भ्रान्तिरेव । सांसिद्धिकद्रवत्वं चास्य गुणः । तच्च नित्यानित्यभेदाद् द्विविधम् । नित्यं परमाणुरूपम् अनित्यं कार्यरूपम् अवयवसमवेतं च । तदपि त्रिविधं शरीरेन्द्रियविषयभेदात् । तत्र शरीरमयोनिजं वरुणलोके प्रसिद्धम् । इन्द्रियं रसनम् । हिमकरकादिर्विषयः ।

तेजस्त्वसामान्यवत् तेजः, उष्णस्पर्शाश्रयश्च । चन्द्रप्रभादौ[2] हिमादिनाभिभवात् तदग्रहः । शुक्लभास्वररूपाश्रयो हि ज्वलनः । मरतककिरणादौ पार्थिवरूपेणाभिभवात् श्वेतरूपाग्रहः । एवं सुवर्णेऽप्युपष्टम्भकपार्थिवरूपेणाभिभवात् तदग्रहः । अत एव न भास्वरत्वं तस्य रूपस्य । पृथिव्यामिव नैमित्तिकद्रवत्वं तेजस्यपि, सुवर्णादिरूपे तेजसि अग्निसंयोगेन द्रवत्वोपलम्भात् । न च सुवर्णस्य तैजसत्वे मानाभाव इति वाच्यम् । अत्यन्तानलसंयोगेऽपि तदीयद्रवत्वस्योच्छेदादर्शनेन तस्य तैजसत्वनिश्चयात् । पार्थिवद्रवत्वस्यात्यन्तानलसंयोगे उच्छेदोपलम्भात् । जलवदेवास्यापि नित्यतादि । किन्त्विह तैजसं शरीरमादित्यलोके प्रसिद्धम् । नयनं तैजसमिन्द्रियम् । विषयो वह्निकनकादिः[3] ।

वायुत्वजातिमान् वायुः । स चापाकजानुष्णाशीतस्पर्श-

---

१. 'यो' क, ख, पाठ.. २. 'दौ च हि' ग. पाठ.. ३. 'रि' ख, ग, पाठः.

वानप्रत्यक्षश्च । वियति विक्षिप्तानां तृणादीनां धारणेन शाखादीनां कम्पनेन चानुमीयते । अयं प्रत्यक्षश्चेत्यग्रे वक्ष्यते । पूर्ववदेवास्य नित्यतादि । वायवीयं शरीरं पिशाचादीनां प्रसिद्धम् । त्वगिन्द्रियं वायवीयम् । घ्राणादिर्विषयः ।

शब्दाश्रय आकाशः । स चैको विभुर्नित्यश्च । एकमप्याकाशं कर्णशष्कुल्यवच्छेदाच्छ्रोत्रसंज्ञां लभते । तदेवं शब्दग्राहकम् ।

सर्वोत्पत्तिमन्निमित्तं जगदाधारश्च कालः । 'इदानीं घट' इत्यादिप्रत्ययो हि कालस्य घटाधारतामवगाहते । कालकृतपरत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया च तस्य सिद्धिः । स चैको विभुर्नित्यश्च । एकोऽप्ययमुपाधिवशात् क्षणादिव्यवहारहेतुः । उपाधिश्च गुणप्रागभावविशिष्टो घटः, पटप्रागभावावच्छिन्नान्त्यतन्तुसंयोगो वा, स्वकार्यविशिष्टसामग्री वा । पातञ्जलास्तु कालोऽवयवी क्षणलवाद्यवयवक्रमेण जन्यत इत्याहुः । अत्र च सङ्ख्यादयो विभागान्ताः पञ्चैव गुणाः । घटतत्प्रागभावध्वंसैर्भवद्भूतभविष्यत्कालादिव्यवहाराः । घटसत्त्वोपलक्षितः कालो हि भवन्, वर्तमान इत्यर्थः । तत्प्रागभावोपलक्षितसमयो भूतः । तद्ध्वंसोपलक्षितो भविष्यन्निति ।

दिक्कृतपरत्वापरत्वासमवायिकारणसंयोगाश्रयो दिक् पूर्वादिप्रत्ययनिमित्तं च । 'अयं पूर्वः' 'अयमपर' इत्यादिप्रत्ययो हि

१. 'न च शा' ख. पाठ　　२. 'व च म' ग. पाठ

घटादेरुदयाचलास्ताचलसंयोगवैशिष्ट्यं विषयीकरोति। नचोदयाचलादिसंयोगः साक्षात्सम्बन्धेन घटादौ विद्यते, किन्तु स्वसमवायिसंयुक्तसंयोगरूपपरम्परासम्बन्धेनेति सम्बन्धघटकतया भवति दिग् निमित्तमुक्तप्रत्यये। पूर्ववदियमपि विभ्वी नित्यैका चोपाधिवशात् प्राच्यादिव्यपदेशभेदं लभते। उपाधिश्चोदयाचलसंयोगादिरेव। उदयाचलसंनिहिता दिक् प्राची। अस्ताचलसन्निहिता दिक् प्रतीची। सुमेरुसन्निहिता दिगुदीची। तद्व्यवहिता त्ववाची। कालवदस्यामपि सङ्ख्यादयः पञ्चैव गुणाः। आकाशादयस्तिस्रः संज्ञा न जातिनिमित्ताः, आकाशत्वादीनां जातीनामभावात्। नित्यत्वे सत्यनेकसमवेता हि जातिरित्युच्यते। यथा पृथिवीत्वादि। न चाकाशत्वादिकं तथा, आकाशादेरेकव्यक्तित्वेन तस्यानेकसमवेतत्वाभावादिति। दीधितिकृतस्तु दिक्कालाकाशा नेश्वरादतिरिच्यन्ते, तद्व्यवहारस्य परमात्मनैवोपपत्तेरिति प्राहुः। विस्तरस्तु पदार्थखण्डनादौ द्रष्टव्यः।

आत्मत्वजातिमान् समवायेन ज्ञानाश्रयो वा आत्मा। स च द्विविधः जीवात्मपरमात्मभेदात्। तत्र जीवो बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाख्यसंस्कारवान् शरीरेन्द्रियादिव्यतिरिक्तः अहमितिप्रतीतिविषयः कर्ता भोक्ता च प्रतिशरीरं सुखादिवैचित्र्याद् भिन्नश्च। शरीरमेवात्मेति सौगताः, इन्द्रियाणीति तदेकदेशिनः। क्षणिकमालयविज्ञानमात्मेति विज्ञानवादिनः। नित्यं विज्ञानमात्मेत्यौपनिषदाः। एतन्मतविवेकनिरासप्रकारावात्मविवेकादिषु द्रष्टव्यौ। वयं तु विस्तराद् बिभीमः।

परमात्मा तु जगतः कर्ता । बुद्धीच्छाप्रयत्नास्त्रय एव विशेषा इति प्राञ्चः । दीधितिकृतस्तु सुखमपि तत्राङ्गीचक्रुः । स चैको जीवविलक्षणः सर्वज्ञः, शरीररहितश्चेति संक्षेपः ।

मनस्त्वजातियोगि मनः । सुखादिसाक्षात्कारसाधनतया च तस्य सिद्धिः । तत्सम्बन्धाद् बाह्येन्द्रियाणि ज्ञानं जनयन्ति । तच्चाणुपरिमाणम्, एकदा सर्वेन्द्रियैर्ज्ञानाजननात् । अथावधानवतामवधानादौ अन्येषां दीर्घशष्कुलीभक्षणादौ च युगपत् सर्वेन्द्रियैर्ज्ञानदर्शनाद् आकाशादिवद् वैभवं तस्येति मीमांसकाः । वेदान्तिनस्तु सर्वदा ज्ञानयौगपद्यायौगपद्ययोरदर्शनान्न तस्य वैभवमणुत्वं वा, किन्तु सङ्कोचविकासात्मकं मध्यमपरिमाणमित्याहुरिति संक्षेपः ॥

इति द्रव्यनिरूपणम् ।

---

अथ गुणनिरूपणम् ।

अथ गुणा निरूप्यन्ते । गुणत्वजातिमन्तो गुणाः द्रव्यकर्मान्यत्वे सति सामान्यवन्तो वा । रूपरसगन्धस्पर्शपरत्वापरत्वगुरुत्वद्रवत्वस्नेहवेगाना मूर्तगुणत्वं साधर्म्यम् । शब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनानाममूर्तगुणत्वम् । सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागानामुभयगुणत्वम् । धर्माधर्मगुरु-

---

१ 'वृत्त्यादि' क पाठः

* विशेषगुणा इत्यर्थः ।

त्वभावनाव्यतिरिक्तानामिन्द्रियग्राह्यत्वम् । रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वस्नेहवेगस्थितस्थापकानां बहिरिन्द्रियग्राह्यत्वम् । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नानामन्तरिन्द्रियग्राह्यत्वम् । रूपरसगन्धस्पर्शशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नानामेकेन्द्रियग्राह्यत्वम् । सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्काराणां* द्वीन्द्रियग्राह्यत्वम् । रूपरसगन्धस्पर्शबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनास्नेहसांसिद्धिकद्रवत्वशब्दानां विशेषगुणत्वम् । तत्र स्वाश्रयसमानाधिकरणद्रव्यविभाजकधर्मात्यन्ताभावसमानाधिकरणगुणावृत्तिगुणत्वव्याप्यजातिमत्त्वम् । यां जातिमादाय लक्ष्ये लक्षणसङ्गतिः, तत्परं लक्षणे स्वपदम् । तथाच स्वाश्रयसमानाधिकरणो यो द्रव्यविभाजको धर्मः, तदत्यन्ताभावसमानाधिकरणो यो गुणस्तदवृत्तिर्या गुणत्वव्याप्या जातिस्तद्वत्त्वम् । वर्तते चेदं नीलरूपादौ । स्वं नीलत्वादि, तदाश्रयो यो नीलादिः तदधिकरणवृत्तिर्यो द्रव्यविभाजकधर्मः पृथिवीत्वादिः तदत्यन्ताभावसमानाधिकरणो जलादौ वर्तते यो गुणः संयोगादिः, तदवृत्तिर्या गुणत्वव्याप्या जातिः नीलत्वादिरेव, तद्वत्त्वं नीलादेरिति । संयोगादौ सामान्ये[1]† च न लक्षणसत्त्वम् । स्वं संयोगत्वं, तदाश्रयसमानाधिकरणो यो द्रव्यविभाजको धर्मः पृथिवीत्वादिः, तदत्यन्ताभावसमानाधिकरणो यो गुणः संयोगादिरेव, तद्वृत्तिरेव संयोगत्वादिः, न तदवृत्तिरितीतरेषां सामान्यगुणत्वम् । शब्द-

1. 'स्व वर्तते इयादौ । श' ग. पाठ .

* भावनाव्यतिरिक्तसंस्काराणामित्यर्थः । † संयोगादिसामान्यगुणे इत्यर्थः.

बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनासंयोगविभागानाम-व्याप्यवृत्तित्वम् । इतरेषां व्याप्यवृत्तित्वम् । इत्यादि गुणानां साधर्म्यं द्रष्टव्यम् ।

तत्र रूपत्वजातिमद् रूपं चक्षुर्मात्रग्राह्यगुणो वा । शुक्लनीलपीतहरितलोहितश्यामचित्रभेदेन सप्तविधं तत् । अव्याप्यवृत्तिनानारूपैरेव चित्रव्यवहारस्योपपत्तेरतिरिक्तचित्रे मानाभावेन षड्विधमेव रूपमित्यन्ये । तच्च द्विविधं नित्यानित्यभेदात् । तत्र पाथस्तेजःपरमाणुगतं नित्यम् । पार्थिवपरमाणुगतं कार्यद्रव्यगतं चानित्यम् । प्राभाकरास्तु नीलारुणादिव्यक्तय एकैकाः । न चैकनीलनाशे जगतो नीलशून्यतापत्तिरिति वाच्यम् । नीलादेर्नित्यत्वाभ्युपगमेन नाशविरहादिति वदन्ति । तन्न । नीलो नष्टो रक्त उत्पन्न इत्यनुभवबलेन नीलादेरुत्पादविनाशशालितया नित्यत्वायोगात् । नीलादेस्तारतम्यस्यानुभूयमानतया एकत्वायोगाच्चेति सङ्क्षेपः ।

रसत्वजातिमान् रसनेन्द्रियग्राह्यगुणो वा रसः । मधुरतिक्तकटुकषायाम्ललवणचित्रभेदेन सप्तविध इति संप्रदायः । परे तु अतिरिक्तचित्ररसे मानाभावः, चित्ररसप्रत्ययस्यावयवगतनानारसैरेवोपपत्तेः । अवयविनो नीरसत्वेऽपि क्षतिविरहादित्याहुः । पूर्ववदयमपि द्विविधः । जलपरमाणुगतो नित्यः । जन्यजले पृथिव्यां च सर्वत्रानित्यः । अवयविरसे चावयवरसोऽसमवायिकारणम् ।

---

१. 'सो' ख. पाठ.

गन्धत्वजातिमान् घ्राणग्राह्यविशेषगुणो वा गन्धः। स च द्विविधः सुरभिरसुरभिश्चेति। सर्वो गन्धोऽनित्यः। अवयविगन्धेऽवयवगन्धोऽसमवायिकारणं च।[1]

स्पर्शत्वजातिमान् त्वगिन्द्रियमात्रग्राह्यगुणो वा स्पर्शः। स च त्रिविधः शीतोष्णानुष्णाशीतस्पर्शभेदात्। नित्यानित्यभेदेन द्विविधश्च। आप्यतैजसवायवीयपरमाणुषु नित्यः। जन्यद्रव्ये पार्थिवपरमाणौ चानित्यः। अवयविस्पर्शेऽवयवस्पर्शोऽसमवायी च। सर्वेऽप्येते चत्वारो द्रवत्वं च पृथिव्यां क्वचिदवयवरूपादितः, क्वचिच्च पाकादुत्पद्यन्ते। केचिदाश्रयनाशात्, केचित् पाकाद् विनश्यन्ति। न च पृथिवीपरमाणुगतानामेषामुत्पादविनाशयोर्मानाभाव इति वाच्यम्। नीलमधुरसुरभिकठिनादिवस्तूनां भस्मनि विपरीतरूपादय उपलभ्यन्ते। न च भस्मारम्भकपरमाणुषु तादृशरूपादिकमन्तरेण भस्मानि ते भवितुमर्हन्ति। कारणगुणानां कार्यगुणारम्भकत्वादिति भस्मारम्भकपरमाणुभिस्तादृशरूपादिमद्भिर्भवितव्यम्। त एव च परमाणवस्तादृशवस्तुनोऽप्यारम्भकाः। अतिरिक्तकल्पने गौरवान्मानाभावाच्च। ते च यदि भस्मारम्भकालात् प्रागपि भस्मगतरूपादिजातीयरूपादिमन्तस्तदा तादृशैस्तैरारब्धे वस्तुन्यपि तादृशरूपादयो भवेयुः। इदानीं वा यदि ते नीलादिमन्तस्तदा तद्भस्मन्यपि तादृशरूपाद्युपलम्भापत्तिः। अतस्तादृशवस्तुनस्तेजःसंयोगे सति[2] तदारम्भकपरमाणुष्वपि तेजःसंयोगेन पूर्वरूपादिनाशेन तदा रूपान्तरोत्पादोऽङ्गी-

१ 'यी च' ख. पाठ. २ 'ति त' ग. पाठ.

कर्तव्य इति । सिद्धं नित्यपृथिवीगतानां तेषामनित्यत्वमित्येषा दिक् । अथ पाकाद् रूपाद्युत्पत्तिः क, क वावयवरूपादित इति चेद्, अत्र सिद्धान्तानुयायिनः—सत्यवयविनि पाकेन रूपनाशो न संभवति, समवेतनाशं प्रत्याश्रयनाशस्य हेतुतया विना कारणं कार्योत्पत्तेरसंभवात् । अतः पाकेन द्व्यणुकाद्यन्त्यावयविपर्यन्तमवयवनाशक्रमेण नश्यति । नष्टे च तस्मिन् केवलेषु परमाणुषु पाकतः श्यामनाशरूपान्तरोत्पत्ती संपद्येते । ततो द्व्यणुकादिक्रमेण कार्यद्रव्यान्तराण्युत्पद्यन्ते । ततस्तेषु कारणगुणक्रमेण रूपान्तरोत्पादः । इत्थं च पाकात् परमाणावेव पूर्वरूपनाशरूपान्तरोत्पादाविति । नैयायिकाः पुनरेवमुपवर्णयन्ति—पाकेन द्व्यणुकाद्यन्त्यावयविपर्यन्तं द्रव्यनाशद्रव्यान्तरोत्पादौ न युक्तौ, गौरवान्मानाभावाच्च । न चाश्रयनाशस्य समवेतनाशहेतुतया विना पूर्वद्रव्यनाशं पूर्वरूपनाशो न संभवतीति वाच्यम् । विनाप्याश्रयनाशं परमाणुरूपादिनाशेन उक्तकार्यकारणभावाभावात् । अपि च पूर्वद्रव्यनाशाङ्गीकारे श्यामघटादौ कृतानां रेखोपरेखादीनां पाकानन्तरमनुपलम्भापत्तिः । न चावयविनावष्टब्धेष्ववयवेषु पाको न संभवतीति वाच्यम् । अवयविनः सच्छिद्रतया सत्येवावयविनि वह्नेरन्तः प्रवेशसंभवात् । एवञ्च पाकेन परमाण्वाद्यन्त्यावयविपर्यन्तम् एकदैव श्यामादिनाशः, अनन्तरं परमाणावेव पाकजरूपोत्पादः । द्व्यणुकादौ तु कारणगुणक्रमेण रूपान्तरोत्पाद इति । नवीनास्तु—युगपदेव परमाण्वाद्यन्त्यावयविपर्यन्तं रूपनाशवद् रूपान्तरोत्पादः, न तु कारणगु-

णक्रमेणेति वदन्ति । अथ द्व्यणुकनाशमवधीकृत्य कियद्भिः क्षणैर्द्व्यणुकान्तरं रूपादिमद् भवतीति शिष्यबुद्धिवैशद्याय प्रक्रिया प्रदर्श्यते । वह्निना नोदनादभिघाताद् वा परमाणुषु प्रथमं कर्म, ततं आरम्भकसंयोगप्रतिद्वन्द्वी विभागः, तत आरम्भकसंयोगनाशः, ततो द्व्यणुकनाशः परमाणोरुत्तरदेशसंयोगश्चेत्येकक्षणः । ततः श्यामनाशपरमाणुक्रियानाशौ । अनन्तरं परमाणौ रक्तरूपमदृष्टवदात्मसंयोगाद् द्रव्यारम्भानुकूलक्रिया च । ततः क्रियया विभागः, विभागात् पूर्वदेशसंयोगनाशः, ततः परमाणुद्वयसंयोगः, ततो द्व्यणुकोत्पादः, ततो रक्तोत्पाद इति । नवक्षणादिप्रक्रियास्तु विस्तरभयान्न प्रदर्श्यन्ते । पुनरमी रूपादयश्चत्वार उद्भूतानुद्भूतभेदेन द्विविधाः । तत्रोद्भूताः परमाणुद्व्यणुकादिषु । अनुद्भूताः पुनः घ्राणादिष्विन्द्रियेषु, पवनानीतकुसुमसलिलावयवेषु, तप्तवारिस्थदहनादिषु चेति प्राञ्चः । नवीनास्तु—अनुद्भूतरूपादौ मानाभावः । न चैवं घ्राणादेर्नीरूपादित्वापत्तिरिति वाच्यम् । इष्टापत्तेरिति प्राहुरिति संक्षेपः ।

संख्यात्वजातिमान् गणनाव्यवहारासाधारणनिमित्तं वा गुणः संख्या । सा चैकत्वादिपरार्धपर्यन्ता । तत्र नित्यगतमेकत्वं नित्यम् । अनित्यगतमेकत्वमनित्यं यावद्द्रव्यभावि आश्रयनाशनाश्यं च । अवयवगतमेकत्वमवयविगतैकत्वेऽसमवायिकारणमिति प्राञ्चः । नवीनास्तु—एकत्वस्यासमवायिकारणमेव नास्ति । तद्विलम्बेन तद्विलम्बाभावात् । नियतपूर्ववृत्तित्वमात्रेणावयवगतैक-

१. 'न्मतास्तु' इति पाठः.

त्वस्य हेतुत्वे तद्गतपरिमाणादेरपि जनकत्वापत्तेः। न च समवेतकार्यमात्रेऽसमवायिकारणापेक्षानियमाद् अवयवगतैकत्वमसमवायिकारणमिति वाच्यम्। तत्र हि कारणैकार्थप्रत्यासत्त्या कार्यजनकत्वादसमवायिकारणत्वं वाच्यम्। सा च प्रत्यासत्तिः परिमाणादेरप्यविशिष्टेति पूर्वदोषानिवारणात्। अनुगतानतिप्रसक्तस्यासमवायिकारणत्वस्याभावेन भावकार्यमात्रेऽसमवायिकारणवत्त्वनियमे मानाभावाच्च। प्रागुक्तासमवायिकारणलक्षणस्य तन्तुतुरीसंयोगादेः पटासमवायिकारणत्वापत्त्या ज्ञानादेरिच्छाद्यसमवायिकारणत्वप्रसङ्गेन चायुक्तत्वादिति। विस्तरस्तु गुणरहस्यादौ द्रष्टव्यः। द्वित्वादिपरार्धपर्यन्ता सङ्ख्या व्यासज्यवृत्तिरनित्या चापेक्षाबुद्धिजन्या तन्नाशनाश्या च। द्वित्वाश्रयव्यक्तीनां प्रत्येकमेक(त्व)बुद्धिरयमेकोऽयमेक इत्या(द्या?)कारापेक्षाबुद्धिः। इयं द्वित्वादौ निमित्तकारणम्। प्रत्येकमेकत्वमसमवायिकारणम्। प्रथममपेक्षाबुद्धिः, ततो द्वित्वोत्पत्तिः, अथ द्वित्वनिर्विकल्पकं, ततो द्वित्वविशिष्टप्रत्यक्षं तदैवापेक्षाबुद्धिनाशश्च, ततो द्वित्वनाश इति द्वित्वाद्युत्पत्तितन्नाशक्रमः। परमाणुद्वित्वादिकमीश्वरापेक्षाबुद्ध्या योगिनामपेक्षाबुद्ध्या चोत्पद्यत इति। दीधितिकृतस्तु—संख्या न गुणः, चतुर्विंशतिर्गुणाः पञ्च कर्माणीति गुणादावपि तत्प्रतीतेः। न हि गुणादौ गुणः समस्ति, गुणादीनां निर्गुणत्वं साधर्म्यमित्यभिधानात्। अतः पदार्थान्तरमेव संख्येत्याहुरितिसंक्षेपः।

---

१ 'इया' न ख पाठ ४. 'भत्त' ग पाठ

परिमाणत्वजातियोगि मानव्यवहारासाधारणकारणं वा गुणः परिमाणम् । तच्चतुर्विधम्, अणुमहद्दीर्घह्रस्वभेदात् । सर्वं च तन्नित्यगतं नित्यमनित्यगतमनित्यम् । तस्मिंश्च क्वचित् परिमाणं क्वचित् संख्या क्वचित् प्रचयो† ऽसमवायिकारणम् । तत्र त्र्यणुकादिपरिमाणमवयविपरिमाणेऽसमवायिकारणम् । अवयवगतं च तत् स्वापेक्षयोत्कृष्टं[१] स्वसमानजातीयमवयविनि परिमाणमुत्पादयति । त्रुटिपरिमाणे द्व्यणुकपरिमाणे च संख्या असमवायिकारणम् । न च तत्रापि स्वावयवपरिमाणमेवासमवायिकारणमस्तु, किं संख्याहेतुत्वेनेति वाच्यम् । परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वस्वभावस्योक्ततया परमाणुपरिमाणस्य जनकत्वे द्व्यणुकादेरणुतरत्वप्रसङ्गेनाणुतरारब्धत्र्यणुकस्याणुतमत्वापत्त्या त्रसरेणोरचाक्षुषत्वप्रसङ्गात् । अतः परमाणुद्वित्वं द्व्यणुकपरिमाणे, द्व्यणुकबहुत्वं त्र्यणुकमहत्त्वे चासमवायिकारणमिति प्राञ्चः । नवीनाः पुनरुन्नयन्ति —द्व्यणुकनिष्ठात्यन्तापकृष्टाणुपरिमाणं प्रति परमाणुनिष्ठोत्कृष्टाणुपरिमाणस्य जनकत्वं, त्र्यणुकनिष्ठापकृष्टमहत्त्वं प्रति द्व्यणुकपरिमाणस्यैव जनकत्वं, न तु संख्यायाः, मानाभावात् । न च परमाण्वादिपरि[२]माणस्यापि जनकत्वे द्व्यणुकादेरणुतरत्वापत्तिरिति प्रागुक्तदोष इति वाच्यम् । परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वस्वभावनियमे मानाभावेनोक्तदोषानवकाशात् । न चाणुपरि-

---

१. 'विप' ख पाठ. २ 'त्वादिपा' ख पाठ.

---

† प्रचयस्तूलादिगत शिथिलाख्यः संयोग ।

माणस्यापि कारणत्वे अणुपरिमाणभिन्नानां कारणत्वमिति सिद्धान्तविरोध इति वाच्यम्। तत्राणुपरिमाणशब्देन मनोगताणुपरिमाणस्यैव ग्रहणादिति वदन्ति। प्रचयापरनाम्ना प्रशिथिलावयवसंयोगेन तूलपिण्डादौ परिमाणमुत्पद्यते। अनित्यं च परिमाणं यावद्द्रव्यभावि आश्रयनाशनाश्यं चेति।

अयमस्मात् पृथगिति व्यवहारासाधारणकारणं पृथक्त्वत्वजातिमान् वा गुणः पृथक्त्वम्। तच्चायमस्मात् पृथगित्येकस्मिन् प्रतीयमानमेकपृथक्त्वम्। तच्च नित्येषु नित्यमनित्येष्वनित्यमेकत्ववत्। इमावस्मात् पृथग् इमे अस्मात् पृथगिति प्रतीयमानं द्विपृथक्त्वत्रिपृथक्त्वादिकम्। तच्च द्वित्वादिवदपेक्षाबुद्धिजन्यं तन्नाशनाश्यं चेति न्यायवैशेषिकसम्प्रदायः। दीधितिकारादयस्तु— पृथक्त्वं न गुणः, अयमस्मात् पृथगित्यादिप्रतीतेरन्योन्याभावेनैवोपपत्तेरित्याहुः।

संयोगत्वजातिमान् युतसिद्धयोः सम्बन्धो वा संयोगः। स द्विविधः कर्मजः संयोगजश्चेति। कर्मजोऽपि द्विविधः उभयकर्मजोऽन्यतरकर्मजश्चेति। तत्राद्यप्रथमो यथा सक्रिययोर्मल्लयोर्मेषयोर्वा संयोगः। आद्यद्वितीयस्तु घटाकाशसंयोगादिः। संयोगजसंयोगो हि कारणाकारणसंयोगात् कार्याकार्यसंयोगः। यथा हस्तपुस्तकसंयोगात् कायपुस्तकसंयोगः। ननु का पुनर्युतसिद्धिरिति चेदत्र भाष्यकारः— पृथग्गतिमत्त्वं युताश्रयाश्रितत्वं

र युतसिद्धिरिति। परस्परसंयोगजनककर्मवत्त्वमाद्यस्यार्थः। द्वितीयस्य तु युते संयुक्ते आश्रये आश्रितत्वमेकतरद्रव्यस्येत्यर्थः । यदेकतरसमवेतावृत्तिसंयोगजनको यः संयोगस्तदेकतरप्रतियोगिकः, तद्वत्समवेतत्वमन्यतरस्येति फलितोऽर्थः । ईदृशी युतसिद्धिर्घटपटयोरस्ति। एकतरो घटः तत्समवेते न वर्तते यो घटपटसंयोगः तज्जनको यो घटतन्तुसंयोगः तद्वति तन्तौ समवेतत्वं पटस्येति भवति घटपटयोर्युतसिद्धिः । तन्तुपटयोश्च नेदृशी युतसिद्धिः । तयोरेकतरस्तन्तुः तत्समवेते पटादौ न वर्तते यः संयोगस्तन्तुघटसंयोगः तज्जनको यस्तन्तुप्रतियोगिककपालसंयोगः, तद्वति कपाले समवेतत्वाभावात् पटस्य । अत्रैकतरसमवेतावृत्तीत्यस्यानुपादाने कपालद्वयसंयोगजनको यः कपालान्तरावयवप्रतियोगिकैकपालसंयोगः तद्वति कपाले समवेतत्वं घटस्येति कपालावयवघटयोर्युतसिद्ध्यापत्तिः । अतस्तदुपात्तम् । कपालावयवकपालसंयोगस्य कपालावयवसमवेतवृत्तिकपालद्वयसंयोगजनकत्वेन कपालावयवसमवेतावृत्तिसंयोगजनकत्वाभावाद् घटसमवेतावृत्तिकपालद्वयसंयोगजनककपालावयवप्रतियोगिकसंयोगवति कपाले समवेतत्वेऽपि घटस्य[2] न कपालेन युतसिद्धिप्रसङ्गः । प्रथमैकतरशब्देन यस्य ग्रहणं[3] द्वितीयैकतरशब्देन तस्यैव ग्रहणात्[4] । तदेकतरप्रतियोगिकेत्यस्यानुपादाने कपालसमवेतावृत्तिः कपालपटसंयोगः तज्जनकस्तन्तुकपालसंयोगः तदधिकरणं कपालमपि तत्समवेतत्वस्य घटे सत्त्वाद् घटकपा-

१. 'त' ख. पाठ, २. 'कम' ख पाठ ३ 'ण तस्यैव द्वितीयैकतरपदेन ग्र' ख पाठ, ४ कत्वस्या' ग पाठ

लयोर्युतसिद्ध्यापत्तिः। अतस्तदुपादानम्। निरुक्तसंयोगजनककपालप्रतियोगिकसंयोगाश्रयश्च न कपालः। स्वप्रतियोगिकसंयोगस्य स्वस्मिन्नभावात्, किन्तु तन्तुरेव। तत्समवेतत्वं न घटस्येति नोक्तो दोषः। न चावयवावयविनोर्युतसिद्ध्यसंभवेऽपि परस्परसंयोगजनकगतिमत्त्वमित्यायां[1] युतसिद्धिः कुतो न[2] संभवतीति वाच्यम्। कर्मणां ह्यभिमुखदेशसंयोगजनकत्वं स्वभावः। अभिमुखश्च कस्यचित् कर्मणः कश्चिद् देश इति अवयविरूपश्च देशो नावयवकर्मणोऽभिमुख इत्यवयवक्रियाया न संयोगजनकत्वम्। अवयवावयविनोर्निरुक्तयुतसिद्धेरभावान्न[3] संयोगः सम्बन्ध इति। नवीनास्तु—शिरसि शरीरसंयुक्तः पाणिरिति अनुभवबलादवयवकर्मणा अवयविनि संयोगजनने बाधकविरहादवयवावयविनोरपि संयोगमूरीकुर्वन्तीति संक्षेपः।

विभागत्वजातिमान् विभक्त इति प्रत्ययासाधारणकारणं वा विभागः। सोऽपि संयोगवद् द्विविधः कर्मजो विभागजश्चेति। तत्राद्यः संयोगवदेव द्विविधः। श्येनपर्वतविभागोऽन्यतरकर्मजः। मेषयोर्मल्लयोर्वा विभाग उभयकर्मजः। विभागजोऽपि द्विविधः कारणमात्रविभागजः कारणाकारणविभागजश्चेति। तत्र कारणमात्रविभागजो यथा—यत्र कपाले घटनाशानुकूला क्रिया तया क्रियया घटारम्भकसंयोगविरोधी कपालद्वयविभागः तस्मात् कपालद्वयविभागात् कपालाकाशविभागः ततो

१. 'दि' ग पाठः. २. 'न भ' ख पाठ. ३ स एवावयवि' ग. पाठ.

गगनकपालसंयोगनाशः ततः कपालस्योत्तरदेशसंयोगः ततः कपालकर्मणो नाश इति । ननु तया कपालक्रिययैव कुतो न कपालद्वयविभागवत् कपालाकाशविभागोऽपि जन्यत इति चेत्, शृणु । आरम्भकसंयोगप्रतिद्वन्द्विविभागजनककर्मणोऽनारम्भकसंयोगप्रतिद्वन्द्विविभागाजनकत्वनियमात् । अन्यथा विकसत्कमलमुकुलभङ्गापत्तेः । कमलदलकर्मणानारम्भकसंयोगप्रतिद्वन्द्विविभागजनकेन कमलारम्भकसंयोगप्रतिद्वन्द्विविभागस्यापि जननसम्भवात् । विस्तरेण चैतत् कर्मनिरूपणावसरे निरूपयिष्यते । कारणाकारणविभागजस्तु हस्तपुस्तकविभागात् कायपुस्तकविभागः । नवीनास्तु—विभक्त इति प्रत्ययस्य संयोगध्वंसविषयत्वेनैवोपपत्तेर्विभागगुण एव नास्तीत्याहुः ।

परापरव्यवहारासाधारणकारणे परत्वापरत्वे । ते च द्विविधे दिक्कृते कालकृते चेति । तत्र कालकृतपरत्वापरत्वे अनित्यद्रव्यगते । तयोश्च बहुतर(ल्पतर)तपनपरिस्पन्दान्तरितजन्मत्वबुद्धी निमित्ते । परत्वापरत्वाश्रयपिण्डस्य कालस्य च संयोगोऽसमवायिकारणम् । तदुत्पत्तिप्रकारश्चेत्थम्—इन्द्रियसन्निकृष्टे स्थविरपिण्डे प्रथमम् अयमस्माद् बहुतरतपनपरिस्पन्दान्तरितजन्मेति बुद्धिः, ततस्तस्मिन् परत्वोत्पत्तिः, ततः परत्वनिर्विकल्पकं, ततः परत्वविशिष्टप्रत्यक्षमपेक्षाबुद्धिनाशश्च । ततोऽपेक्षाबुद्धिनाशात् परत्वनाशः । एवं यस्मिन् यदपेक्षयाल्पतरतपनप-

---

१ 'त कर्म' स पाठः. २. 'गोगु' क पाठ. ३. 'त्वाप' स पाठः.

रिस्पन्दान्तरितजन्मत्वबुद्धिः, तस्मिन्नपरत्वमुत्पद्यते । ततः परत्ववदेव तन्नाशादिकं बोध्यम् । दैशिकपरत्वापरत्वयोस्तु बहुतरसंयोगान्तरितत्वाल्पतरसंयोगान्तरितत्वबुद्धी निमित्ते । दिक्पिण्डसंयोगोऽसमवायिकारणम् । तथाहि — इन्द्रियसन्निकृष्टे दूरस्थपिण्डे अयमस्माद् बहुतरसंयोगान्तरित इति बुद्ध्या परत्वमुत्पद्यते । निकटस्थपिण्डेऽल्पतरसंयोगान्तरितत्वबुद्ध्यापरत्वमुत्पद्यते । ततः कालिकवदनयोर्नाश इति । इमे च कालिकपरत्वापरत्वविपरीते, स्थविरेऽपि नेदीयसि दैशिकापरत्वस्य, यूनि दवीयसि दैशिकपरत्वस्य च दर्शनात् । इमे च मूर्तमात्रसमवेते इति । नवीनास्तु — परत्वापरत्वे न गुणान्तरे, ज्येष्ठत्वकनिष्ठत्वाभ्यां कालिकपरत्वापरत्वव्यवहारस्य सन्निकृष्टविप्रकृष्टत्वाभ्यां च दैशिकपरत्वापरत्वव्यवहारस्योपपत्तेरित्याहुरिति दिक् ।

अर्थप्रकाशो बुद्धिः । सा च द्विविधा अनुभूतिः स्मृतिश्चेति । तत्र संस्कारासाधाणकारणकं ज्ञानं स्मृतिः । यथा पूर्वानुभूतेऽर्थे गङ्गादौ सा गङ्गा इत्यादिज्ञानम् । अत्र हि पूर्वानुभवः संस्कारद्वारा कारणम् । स्मृत्यन्यज्ञानमनुभूतिः । सा द्विविधा प्रत्यक्षानुमितिभेदात् । न चोपमितिशाब्दयोरसङ्ग्रह इति वाच्यम् । तयोरनुमितावन्तर्भावात् । यथा चैतत् तथा मूलग्रन्थेषु सुव्यक्तम् । अस्माभिस्तु बालव्युत्पादनाय ग्रन्थैर्दुरूहत्वान्न प्रदर्श्यते । नैयायिकास्तु — उपमितिशाब्दयोः पार्थक्यादनुभूतेश्चातुर्विध्यमित्याहुः । तत्प्रदर्शनं चिन्तामण्यादिषु द्रष्टव्यम् ।

---

१. 'सा द्वि' ग. पाठ'.

वयं तु न्यायमतमनुरुध्यैवानुभूतेश्चातुर्विध्यं प्रदर्शयामः । तत्र प्रत्यक्षं द्विविधं नित्यानित्यभेदात् । तत्र नित्यप्रत्यक्षमैश्वरम् । अनित्यं त्विन्द्रियजन्यम् । तच्च षड्विधं चाक्षुषस्पार्शनादिभेदात् । तत्र चक्षुर्योग्यमुद्भूतरूपं तदाश्रयद्रव्यं तद्गतसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वस्नेहद्रवत्वानि योग्यद्रव्यगता क्रिया तद्गता जातिः तद्गतः समवायश्च । वैशेषिकास्तु — सम्बन्धप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुतया समवायाश्रयगगनादेरप्रत्यक्षतया यावदाश्रयप्रत्यक्षाभावात् समवायो न प्रत्यक्ष इत्याहुः । चाक्षुषप्रत्यक्षे चोद्भूतानभिभूतरूपालोकसंयोगो हेतुः । नातोऽन्धकारे घटादिचाक्षुषापत्तिः । निदाघोष्मण उद्भूतरूपाभावाद् न तत्संयोगेऽपि चाक्षुषम् । सुवर्णस्योद्भूतरूपवत्त्वेऽपि तद्रूपस्याभिभूतत्वेन न तत्संयोगेऽपि चाक्षुषम् । उद्भूतरूपमपि तत्र हेतुः । अत एव तप्तवारिस्थदहनादेर्न चाक्षुषम् । स्पार्शनप्रत्यक्षे उद्भूतरूपं तादृशस्पर्शश्च हेतुः । निदाघोष्मण उद्भूतस्पर्शवत्त्वेऽपि उद्भूतरूपाभावान्न स्पार्शनम् । एवं वायुरपि न स्पार्शन इति प्राञ्चः । नव्यास्तु—स्पार्शनप्रत्यक्षे उद्भूतस्पर्श एव हेतुः, न तूद्भूतरूपमपि, गौरवान्मानाभावाच्च । किन्तु चाक्षुषप्रत्यक्षे उद्भूतरूपं स्पार्शने[2]प्रत्यक्षे उद्भूतस्पर्शश्च हेतुः । न चैवमननुगमम् । इष्टत्वादिति वदन्ति । प्रभाया उद्भूतरूपवत्त्वेऽपि न स्पार्शनम्, उद्भूतस्पर्शाभावात् । त्वचो योग्यम् उद्भूतस्पर्शः तदाश्रयद्रव्यं रूपव्यतिरिक्ताश्चक्षुर्योग्या गुणाः योग्यद्रव्यगता

---

१. 'त्य ज्ञानम् । त' ग. पाठ. २. 'ने उ' ख. पाठ..

क्रिया तद्गता जातिस्तथाविधः समवायश्च । महत्त्वसमानाधिकरणोद्भूतो गन्धस्तद्गता जातिः समवायश्च घ्राणयोग्यः । महत्त्वसमानाधिकरणोद्भूतो रसस्तद्गता जातिः समवायश्च रसनयोग्यः । शब्दस्तद्गता जातिः समवायश्च श्रवणयोग्यः । जीवात्मा तद्गतैकत्वमहत्त्वे सविकल्पकबुद्धिः सुखदुःखेच्छाद्वेषप्रयत्नास्तद्गता जातिः समवायश्च मनोयोग्याः* । टीकाकृतस्तु तदेकत्वपरिमाणे न योग्ये इति वदन्ति ।

षड्विधे[1]ऽपि प्रत्यक्षे इन्द्रियं करणम् । ननु किन्नाम करणत्वम् । उच्यते । व्यापारवत्कारणं करणम् । यथा छिदिक्रियां प्रति परशुः । तस्यच्छिदिक्रियायामुद्यमननिपतने व्यापारः । तज्जन्यस्तज्जन्यजनको हि व्यापारः । भवति ह्युद्यमनादिः परशुजन्यः परशुजन्यच्छिदिक्रियाया जनकश्च । इन्द्रियत्वं तु स्मृत्यजनकज्ञानजनकमनःसंयोगाश्रयत्वम् । अस्ति चेदं चक्षुरादौ । स्मृत्यजनको ज्ञानजनको यो मनस्संयोगः इन्द्रियमनस्संयोगः, तदाश्रयत्वं चक्षुरादेरिति । अत्र स्मृत्यजनकेत्यस्यानुपादाने ज्ञानं प्रत्यात्ममनस्संयोगस्य कारणतया तादृशमनस्संयोगाश्रयत्वमात्मनोऽपीति तत्रातिप्रसङ्गः स्यात् । अतस्तस्योपादानम् । आत्ममनस्संयोगस्य ज्ञानसामान्यकारणतया स्मृतिं प्रत्यपि जनकत्वेन नोक्तदोषः । स्मृत्यजनकमनस्संयोगाश्रयत्व-

---

1 'धे प्र' ग पाठ.

---

* मनोयोग्यानीति स्यात् ।

मित्येतावत्युच्यमाने स्मृत्यजनककालमनस्संयोगाश्रयत्वं काल-स्यापीति तत्रातिव्याप्तिः स्यात्। तत्परिहाराय ज्ञानजनकेति। कालमनस्संयोगस्य ज्ञानजनकत्वाभावान्नोक्तदोषः। स्मृत्यजनको ज्ञानजनकः संयोगश्चक्षुर्घटसंयोगः, तदाश्रयो घटादिरपीति तत्रातिप्रसङ्गपरिहाराय मनःपदम्।

तस्य चेन्द्रियस्य विप्रकृष्टार्थग्राहकत्वाभावात् सन्निकर्षोऽपि सहकारी। स च लौकिकालौकिकभेदेन द्विविधः। तत्र लौकिकसन्निकर्षः षोढा, संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायः विशेषणता चेति। तत्र द्रव्यग्रहे इन्द्रियसंयोगः सन्निकर्षः। द्रव्यसमवेतस्य गुणादेः प्रत्यक्षे संयुक्तसमवायः सन्निकर्षः, चक्षुस्संयुक्ते घटादौ गुणादेः समवायात्। द्रव्यसमवेतगुणादिसमवेतजातिग्रहे संयुक्तसमवेतसमवायः सन्निकर्षः, चक्षुरादिसंयुक्तघटादिसमवेतरूपादौ रूपत्वादिजातीनां समवायात्। शब्दग्रहे समवायः सन्निकर्षः, श्रोत्रस्य गगनात्मकत्वेन तस्मिन् शब्दस्य समवायात्। शब्दसमवेतकत्वखत्वादिजातिग्रहे समवेतसमवायः सन्निकर्षः, श्रोत्रसमवेतककारादौ कत्वादीनां समवायात्। विशेषणतयाभावस्य ग्रहः। सा च नानाविधा। तथाहि—क्वचित् संयुक्तविशेषणता, यथा चक्षुरादिसंयुक्ते भूतलादौ घटाद्यभावप्रत्यक्षे। क्वचित् संयुक्तसमवेतविशेषणता, यथा चक्षुरादिसंयुक्तघटादिसमवेते रूपादौ रसत्वाद्यभावग्रहे। क्वचित् संयुक्तसमवेतसमवेतविशेषणता, यथा चक्षुरसंयुक्तघटादिसमवेतरूपादिसमवेतरूपत्वादौ रसत्वा-

घभावग्रहे। क्वचिद् विशेषणता, यथा श्रोत्रे शब्दाभावग्रहे। श्रोत्रस्य गगनात्मकत्वेन तस्मिन् शब्दाभावस्य विशेषणतया वृत्तेः। क्वचित् समवेतविशेषणता, (यथा) श्रोत्रसमवेते ककारादौ खत्वाद्यभावग्रह इत्याद्यूह्यम्। भूतलादौ घटादेरुपलम्भदशायां घटाद्यभावाग्रहात् प्रतियोग्यनुपलम्भोऽपि सहकारी। अथैवं भूतलादौ पिशाचाद्यभावोऽपि गृह्येत, भूतलादौ पिशाचादेः प्रतियोगिनोऽनुपलम्भादिति चेद्, उच्यते। न प्रतियोग्यनुपलब्धिमात्रं हेतुः, किन्तु योग्यानुपलब्धिः। योग्या सहकारिसम्पन्ना अनुपलब्धिर्योग्यानुपलब्धिः। अथ कः सहकारीति चेत्, शृणु। क्वचित् प्रतियोगियोग्यत्वम्। अत एव भूतलादौ पिशाचाद्यभावो न प्रत्यक्षः। तत्प्रतियोगिनः पिशाचादेरयोग्यत्वात्। क्वचिच्चाधिकरणयोग्यत्वम्। अत एव स्तम्भे पिशाचान्योन्याभावः प्रत्यक्ष इति संक्षेपः। भाट्टास्तु—इन्द्रियाणां सम्बद्धार्थग्राहकत्वादभावेन सममिन्द्रियस्यासन्निकर्षान्नेन्द्रियाणामभावग्रहे करणत्वं, किन्तु योग्यानुपलब्धिः करणम्। अत एव सा प्रमाणान्तरमित्याहुः। तन्न। अभावग्रहेऽपि सन्निकर्षस्योक्ततया तत्रेन्द्रियस्य करणत्वसम्भवेनातिरिक्तप्रमाणकल्पने मानाभावाद्, अनुपलब्धेर्व्यापाराभावेन करणत्वायोगाच्चेति।

अलौकिकः सन्निकर्षस्त्रिविधः सामान्यलक्षणो ज्ञानलक्षणो योग(ज)लक्षणश्चेति। अत्र लक्षणशब्दः स्वरूपवाची। तथाच सामान्यं लक्षणं स्वरूपं यस्य स सामान्यसन्निकर्ष इति लभ्यते। तत्रेन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतं प्रत्यासत्तिः। तथाचे-

न्द्रियसंयुक्ते घटादावयं घट इत्यादिज्ञानम् । तत्र प्रकारो घटत्वादि । तेन सन्निकर्षेण घटत्वाश्रययावद्विशेष्यकं घट इत्याकारकं प्रत्यक्षमुत्पद्यते । तत्र घटत्वाश्रययावद्व्यक्तिभिः समं चक्षुरादेः संयोगाद्यसम्भवेन ज्ञायमानं घटत्वादिसामान्यं तज्ज्ञानं वा प्रत्यासत्तिः कल्प्यते । ज्ञानलक्षणो यथा — यत्र चन्दनखण्डादौ सौरभं संयुक्तसमवायेन गृहीतं पश्चाच्चन्दनखण्डे दृष्टे स्मृतं सौरभं चक्षुषा गृह्यते सुरभि चन्दनमिति, तत्र चक्षुषा समं सौरभस्य ज्ञानमेव सन्निकर्षः । योगजलक्षणो यथा—योगिनामतीतानागतगोचरप्रत्यक्षं जायते । तत्र योगजधर्म एव सन्निकर्षः । तत्र साधकस्य चिन्तासहकारेण प्रत्यक्षम् । सिद्धस्य तु चिन्तां विनैव प्रत्यक्षमिति । मीमांसकास्तु—सामान्यादिप्रत्यासत्तिजन्यज्ञानानामनुमानादिनैवोपपत्तेः अलौकिकसन्निकर्ष एव नास्तीत्याहुरिति संक्षेपः । पुनश्चेदं जन्यप्रत्यक्षं प्रकारान्तरेण द्विविधं सविकल्पकनिर्विकल्पकभेदात् । तत्र निष्प्रकारकं प्रत्यक्षं निर्विकल्पकम् । तथाहि—जागरादौ प्रथमम अयं घट इत्यादि घटत्वादिविशिष्टघटादिप्रत्यक्षमुपजायते । न च तद् विशेषणीभूतघटत्वादिज्ञानं विना सम्भवति, दण्डादिज्ञानं विना दण्डविशिष्टप्रत्यक्षादर्शनात् । अतो विशेणीभूतघटत्वादिज्ञानमङ्गीकर्तव्यम् । तच्च निष्प्रकारकम् । तस्यापि विशिष्टज्ञानत्वे विशेषणज्ञानाधीनत्वेनानवस्थापत्तेरिति संक्षेपः । तत्पश्चाज्जायमानम् अयं घट इत्यादि सप्रकारकं प्रत्यक्षं सविकल्पकम् । अत्र हि ज्ञाने घटत्वादिकं प्रकारतया भासते, घटो विशेष्यतया, घटत्वसमवायः संसर्गविधया । प्रकारतादयस्तिस्रोऽपि विषयताविशेषरूपाः । विषयता च

स्वरूपसम्बन्धविशेष इति प्राञ्चः। नव्यास्तु विषयताप्रकारतादिः पदार्थान्तरमेवेति वदन्ति । विस्तरभीतेरुपरम्यते ।

इति प्रत्यक्षखण्डः।

---

## अथानुमानखण्डः।

अथानुमितिर्निरूप्यते । अनुमितित्वजातिमद् ज्ञानमनुमितिः । अनुमितित्वं च पर्वते वह्निमनुमिनोमीत्यनुभवसिद्धा जातिः। तस्यां च ज्ञायमानं लिङ्गं करणमिति प्राञ्चः । नव्यास्तु लिङ्गज्ञानं करणमिति प्राहुः । एतदेवानुमितिकरणत्वादनुमानमिति गीयते। परामर्शश्चास्य व्यापारः। किं पुनर्लिङ्गम्, उच्यते। व्याप्याश्रयो लिङ्गम्। यो यद्व्याप्याश्रयः, स तस्य लिङ्गम्। भवति हि धूमो वह्निव्याप्याश्रयः । ततो धूमो वह्नेर्लिङ्गम्। इदमेव हेतुसाधनादिशब्दैर्व्यवह्रियते । यस्य लिङ्गमित्युच्यते, तत् साध्यादिशब्दैरभिधीयते। का पुनर्व्याप्तिरिति चेद्, नियतसाध्यसामानाधिकरण्यमिति गृहाण। यस्य येन सह नियतसामानाधिकरण्यं विद्यते, स तस्य व्याप्यः । धूमस्य हि वह्निना समं नियमेन सामानाधिकरण्यमस्ति, धूमाधिकरणे सर्वत्राग्नेः सत्त्वात्। अतो भवति धूमो वह्नेर्व्याप्यः।[1] वह्निस्तु न धूमेन समं नियतसामानाधिकरण्यमस्ति, वह्न्यधिकरणे सर्वत्र धूमाभावाद्, अयोगोलकादौ तथादर्शनात्। अतो न वह्निर्धूमव्याप्यः। व्याप्तिविशिष्टस्य पक्षवृत्तित्वज्ञानं परामर्शः। तच्च

---

१ 'वानास्तु' ग पाठ  २ 'वीनास्तु' ग पठ

वह्निव्याप्यो धूमः पर्वते इत्याकारं वह्निव्याप्यधूमवान् पर्वत इत्याकारकं वा। इदमेव तृतीयलिङ्गपरामर्शशब्देन व्यवहरन्ति। ननु कथमस्य ज्ञानस्य तृतीयत्वम्, उच्यते। प्रथमं तावन्महानसादौ धूमाग्न्योः सहचारज्ञाने व्यभिचारज्ञानविरहदशायां धूमत्ववह्नित्वसामान्यलक्षणप्रत्यासत्त्या सकलधूमवह्न्युपस्थितौ यत्र यत्र धूमस्तत्र तत्र वह्निरिति प्रागुक्तसामानाधिकरण्यरूपव्याप्तिज्ञानमुपजायते। ततः कालान्तरे पर्वतसमीपं गतस्य पुंसः पर्वतवर्तिनीं धूमव्यक्तिं पश्यतः प्राङ् महानसादौ गृहीताया व्याप्तेर्धूमदर्शनोद्बुद्धसंस्कारवशात् स्मरणं धूमो वह्निव्याप्य इत्याकारकं जन्यते। तत्र धूमो वह्निव्याप्य इति ज्ञानं प्रथमं, धूमवान् पर्वत इति ज्ञानं द्वितीयं, वह्निव्याप्यधूमवान् पर्वत इति ज्ञानं तृतीयं, ततः पर्वतो वह्निमानिति ज्ञानमुत्पद्यते। तदेवानुमितिः। ननु व्याप्यस्य पक्षवृत्तित्वज्ञानं परामर्श इत्युक्तम्। तत्र कः पुनः पक्ष इति चेद्, उच्यते। पक्षताश्रयः पक्षः। पक्षता च सिषाधयिषाविरहविशिष्टसिद्ध्यभावः। साधयितुमिच्छा सिषाधयिषा, तद्विरहविशिष्टा या सिद्धिः साध्यनिश्चयः, स यत्र नास्ति स पक्षः। यथा धूमेन वह्न्यनुमितौ पर्वतः। तत्र हि साध्यस्य वह्नेर्निश्चयो नास्ति। अत एव यत्राधिकरणे महानसादौ व्याप्तिग्रहस्तत्र नानुमितिः, वह्नेस्तत्र निश्चयाद्, निश्चितेऽनुमानानुदयात्। अत एव तादृशो महानसादिः सपक्ष इति भण्यते। न चैवं सिद्ध्यभावमात्रं पक्षतास्तु, किं विशिष्टान्तेन सिद्धिविशेषणेनेति वाच्यम्। यदा महानसादौ

१. 'व्याप्तिरि' ख. पाठ. २. 'अ' ग. पाठः. ३. 'अ' ख. पाठः.

वह्निमनुमिनुयामितीच्छा, तदा तत्र वह्न्यनुमितेरुदयाद् महानसादेः पक्षता न स्यात्। अतो विशिष्टान्तं सिद्धिविशेषणम्। तथाच तत्र सिषाधयिषाविशिष्टैव सिद्धिरस्ति, न तु सिषाधयिषाविरहविशिष्टसिद्धिरिति निरुक्तसिद्ध्यभावसत्त्वात् पक्षतोपपत्तिरिति संक्षेपः।

तच्चानुमानं त्रिविधं केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदात्। तत्रासद्विपक्षः केवलान्वयी, यथा घटोऽभिधेयः प्रमेयत्वादिति। अत्र प्रमेयत्वं हेतुः। अभिधेयत्वं साध्यम्। घटः पक्षः। अस्य हेतोर्विपक्षो नास्ति। निश्चितसाध्याभाववान् हि विपक्ष इत्युच्यते न चात्र साध्यस्याभिधेयत्वस्याभावः क्वचिदस्ति, वस्तुमात्रस्यैवाभिधेयत्वात्। अतोऽत्र हेतुसाध्यसहचारमात्रग्रहात् पटादौ सपक्षे व्याप्तिर्गृह्यत इति प्रमेयत्वरूपो हेतुः केवलान्वयी। मीमांसकास्तु—केवलान्वय्यनुमानमेव नास्ति, घटोऽभिधेयः प्रमेयत्वादिति तदुदाहरणे साध्यसाधनयोः केवलान्वयित्वग्रहे घटेऽपि साध्यनिश्चयेन पक्षताविरहादिति वदन्ति। असत्सपक्षः केवलव्यतिरेकी, यथा पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वादित्यादि। अत्रेतरभेदरूपसाध्यस्य पृथिवीमात्रवृत्तेरन्यत्रानिश्चयाद् हेतुसाध्ययोर्व्याप्तिग्रहस्थलाभावात् सपक्षो नास्ति। अतोऽत्र साध्याभावहेत्वभावयोर्जलादौ विपक्षे सहचारग्रहाद् गन्धवत्त्वे इतरभेदव्याप्तिर्गृह्यते। न चैवमन्ययोः सहचारग्रहादन्यत्र व्याप्तिग्रहे धूमवह्न्योः सहचारग्रहाद् घटपटयोरपि व्याप्तिग्रहप्रसङ्ग इति वाच्यम्।

यदभावयोः सहचारग्रहस्तयोर्व्याप्तिर्गृह्यत इत्यनतिप्रसङ्गात् । सत्सपक्षविपक्षो हेतुरन्वयव्यतिरेकी । यथा पर्वतो वह्निमान् धूमवत्त्वादित्यादि । अत्र महानसादौ सपक्षे हेतुसाध्ययोः सहचारग्रहाद् जलादौ विपक्षे साध्याभावहेत्वभावयोः सहचारग्रहाच्च व्याप्तिग्रहादन्वयव्यतिरेकी धूमादिति हेतुरिति संक्षेपः ।

पुनः प्रकारान्तरेण द्विविधमनुमानं स्वार्थं परार्थं चेति । यत्र स्वयमेव धूमाग्न्योर्व्याप्तिं गृहीत्वा पर्वतादौ धूमपरामर्शादेग्निमनुमिनोति, तत्र स्वार्थम् । यत्र स्वयं वह्निमनुमाय परं प्रति पञ्चावयवमनुमानवाक्यमभिधत्ते, तत्र परार्थम् । पञ्चावयवाश्च प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि । तत्र पक्षे साध्यवैशिष्ट्यबोधजनकन्यायावयवत्वं प्रतिज्ञात्वं, यथा 'पर्वतो वह्निमानि'ति । प्रतिज्ञान्वितस्वार्थबोधकन्यायावयवत्वं हेतुत्वं, यथा 'धूमादिति'। अत्र ज्ञापकत्वं पञ्चम्यर्थः । तच्च प्रतिज्ञार्थे वह्नावन्वेति । व्याप्तिप्रतिपादकन्यायावयवत्वमुदाहरणत्वं, यथा 'यो यो धूमवान् स सोऽग्निमान् यथा महानसमि'ति । पक्षे हेतुवैशिष्ट्यबोधकन्यायावयवत्वमुपनयत्वं, यथा 'तथाचायमि'ति। धूमवांश्चायमिति अस्य वाक्यस्यार्थः। तथाच पक्षे हेतुवैशिष्ट्यबोधजनकत्वादिदं वाक्यमुपनय इत्युच्यते। उपनयसाकाङ्क्षवाक्यं निगमनं, यथा 'तस्मात् तथे'ति । अनेन 'वह्निव्याप्यधूमवत्त्वाद् वह्निमानि'त्यर्थकेनोपनय आकाङ्क्ष्यते, तस्मादिति तच्छब्देन प्रकृतपरामर्शिनोपनयार्थस्य धूमवत्त्वस्य परामर्शात् । अत्र पञ्चस्वपि लक्षणेषु न्या-

---

१ 'ह्निम' स पाठ

यावयवत्वपदम् उदासीनेषु प्रतिज्ञादिसमानाकारेषु वाक्येष्वतिप्रसङ्गवारणाय। एतद्वाक्यपञ्चकसमुदायो न्याय इति भण्यते। मीमांसकास्तु—प्रतिज्ञादय उदाहरणान्ता उदाहरणादयो निगमनान्ता वा त्रय एवावयवा इत्यूचुः। बौद्धास्तु—उदाहरणोपनयौ द्वावेवावयवौ स्वीकुर्वन्तीति संक्षेपः॥

अथ हेत्वाभासा निरूप्यन्ते। ते च पञ्च सव्यभिचारविरुद्धासिद्धसत्प्रतिपक्षकालात्ययापदिष्टभेदात्। तत्र साधारणासाधारणानुपसंहार्यन्यतमत्वं सव्यभिचारत्वम्। साधारणत्वं च साध्यात्यन्ताभाववद्वृत्तित्वं, यथा 'पर्वतोऽयं धूमवान् वह्नेरि'त्यादि। अत्र वह्निरूपो हेतुः साध्यात्यन्ताभाववत्ययोगोलके वर्तते। एतज्ज्ञाने सति नियतसामानाधिकरण्यरूपव्याप्तेर्ज्ञानं प्रतिबध्यते। ततो व्याप्तिज्ञानरूपकारणाभावान्नानुमितिः। पक्षमात्रवृत्तित्वमसाधारणत्वं, यथा 'शब्दो नित्यः शब्दत्वाद्' इत्यादि। अत्र शब्दत्वं हेतुः सपक्षाद् गगनादेर्विपक्षाद् घटादेश्च व्यावृत्तः पक्षे शब्द एव वर्तते। अत्र च दृष्टान्ताभावादन्वयव्याप्तिज्ञानप्रतिबन्धः फलम्। सर्वपक्षः केवलान्वयिसाध्यकः केवलान्वयी हेतुरनुपसंहारी, यथा 'सर्वमभिधेयं प्रमेयत्वादि'त्यादि। अत्र सर्वस्यापि पक्षतया साध्यसाधनयोर्व्याप्तिग्रहस्थलाभावाद् व्याप्तिग्रहो न भवति।

साध्याभावव्याप्यो हेतुर्विरुद्धः, यथा 'गौरयमश्वत्वादि'त्यादि। अत्र गोत्वाभावव्याप्यमश्वत्वमिति ज्ञाने सति गोत्वरूपसाध्यानुमितिः प्रतिबध्यते।

असिद्धिमानासिद्धः । असिद्धिश्चाश्रयासिद्धिस्वरूपासिद्धिव्याप्यत्वासिद्ध्यन्यतमा । आश्रयासिद्धिस्तु पक्षे पक्षतावच्छेदकस्याभावः, यथा 'मणिमयः पर्वतो वह्निमान् धूमवत्त्वादि'त्यादि । अत्र पर्वते पक्षे पक्षतावच्छेदकस्य मणिमयत्वस्याभावनिश्चये वह्निव्याप्यधूमवान् मणिमयः पर्वत इति परामर्शप्रतिबन्धादनुमितिविरहः फलम् । पक्षे हेत्वभावः स्वरूपासिद्धिः, यथा 'अयोगोलकं वह्निमद् धूमादि'त्यादि । अत्र पक्षेऽयोगोलके धूमाभावनिश्चये वह्निव्याप्यधूमवदयोगोलकमिति परामर्शविरहेणानुमित्यभावः फलम् । हेतुत्वेनाभिमते साध्यनिरूपितव्याप्त्यभावो व्याप्यत्वासिद्धिः, यथा 'पर्वतो धूमवान् वह्नेरि'त्यादि । अत्र वह्नौ धूमनिरूपितव्याप्त्यभावनिर्णये व्याप्तिज्ञानविरहादनुमितिप्रतिबन्धः फलम् । एवं 'पर्वतो वह्निमान् नीलधूमवत्त्वादि'त्यादिप्रयोगे नीलधूमादिरपि व्याप्यत्वासिद्धः । ननु कथमयं व्याप्यत्वासिद्धः, धूममात्रस्य वह्निव्याप्यत्वेन नीलधूमस्यापि वह्निव्याप्यत्वादिति चेद्, उच्यते । धूममात्रस्य वह्निव्याप्यत्वेऽपि तत्र नीलविशेषणस्य व्यर्थतया व्यर्थविशेषणविशिष्टे व्याप्तिविरहेण नीलधूमस्यापि व्याप्यत्वासिद्धत्वादिति सक्षेपः ।

सन् प्रतिपक्षो यस्य स सत्प्रतिपक्ष इत्युच्यते । प्रतिपक्षश्च साध्यव्याप्यवत्तापरामर्शकालिकसाध्याभावव्याप्यवत्त्वपरामर्शविषयो हेतुः, यथा 'पर्वतो वह्निमान् धूमवत्त्वादि'त्युक्ते 'स वह्न्यभाववान् पाषाणमयत्वादि'त्यादितदुदाहरणे पाषाणमयत्वादिति हेतुः । अत्र च 'वह्निव्याप्यधूमवान् पर्वत' इति परामर्श-

काले 'वह्न्यभावव्याप्यपाषाणमयत्ववान् पर्वत' इति परामर्शे सति परस्परानुमितिप्रतिबन्धो जायते । न च कथमनयोः परामर्शयोः परस्परानुमितिप्रतिबन्धकत्वमिति वाच्यम्। तदभावव्याप्यवत्ताज्ञानं हि तद्वत्ताज्ञाने प्रतिबन्धकं, 'रजतत्वाभावव्याप्यनीलपृष्ठत्वादिमानि'ति ज्ञाने सति 'रजतत्ववानि'ति ज्ञानानुदयात् । तथाच वह्निव्याप्यधूमवत्ताज्ञानेन 'वह्न्यभाववानि'त्यनुमितिप्रतिबन्धः, 'वह्न्यभावव्याप्यपाषाणमयत्ववान् पर्वत' इति परामर्शेन वह्न्यनुमितिप्रतिबन्धश्च क्रियते । अतोऽनयोः परामर्शयोः परस्परानुमितिप्रतिबन्धकतया परस्परानुमितिविरहः फलम् । रत्नकोशकारास्तु—वह्नितदभावव्याप्यवत्तापरामर्शे सति वह्नितदभावोभयानुमितिः संशयरूपोत्पद्यते । तथाच सत्प्रतिपक्षे संशयाकारानुमितिजनकत्वमेव दूषकताबीजमित्याहुरिति संक्षेपः ।

पक्षे साध्याभावो बाधः, यथा 'गन्धप्रागभावविशिष्टो घटो गन्धवान् पृथिवीत्वादि'त्यादि । अत्र गन्धप्रागभावविशिष्टे घटे पक्षे साध्यस्य गन्धस्याभावनिश्चये गन्धानुमितिप्रतिबन्धो जायते । तदभाववत्ताज्ञानं हि तद्वत्ताज्ञाने प्रतिबन्धकं, भूतलादौ घटाभाववत्ताज्ञाने सति घटवत्ताज्ञानानुदयात् । न च पक्षे घटे गन्धसत्त्वात् कथं बाध इति वाच्यम्। पक्षतावच्छेदकविशिष्टे पक्षे हि साध्यानुमितिः । प्रकृते च गन्धप्रागभावस्य पक्षतावच्छेदकतया तद्विशिष्टे गन्धाभावात् । हेत्वाभासत्वं चानुमितितत्करणज्ञानान्यतरविरोधित्वं ज्ञानस्य यद्विषयकत्वेन, तद्वत्त्वम्।

---

१. 'त्व' ख, पाः

भवति हि साध्याभावव्याप्यविषयकत्वेन विरोधिपरामर्शस्यानुमितिविरोधित्वात् सत्प्रतिपक्षे साध्याभावव्याप्यहेत्वादिकं दोषः। तद्वत्ता च धूमादेरेकज्ञानविषयत्वसंबन्धेन । एवं साध्याभाववत्पक्षविषयत्वेन ज्ञानस्यानुमितिविरोधित्वात् साध्याभाववत्पक्षादिकं बाधे दोषः। तद्वत्त्वं च हेतावस्तीति बाधसत्प्रतिपक्षयोर्लक्षणसङ्गतिः । 'धूमवान् वह्नेरि'त्यादौ वह्न्यादौ धूमव्यभिचारज्ञाने सत्यनुमितिकरणव्याप्तिज्ञानप्रतिबन्धाद् व्यभिचारादिर्दोषः। तद्वत्त्वं च वह्नावस्तीति तत्रापि लक्षणसमन्वयः । न च व्यभिचारिणि हेतावुपाधिज्ञानेऽपि अनुमितिकरणव्याप्तिज्ञानप्रतिबन्धादुपाधेरपि हेत्वाभासत्वापत्तिरिति वाच्यम्। लक्षणे अनुमितितत्करणज्ञानान्यतरविरोधित्वनियम इति विवक्षितत्वात् । उपाधिज्ञानस्य च व्यभिचारज्ञानद्वारा व्याप्तिज्ञानविरोधित्वेन तस्मिन् सत्यपि व्यभिचारज्ञानविरहे व्याप्तिज्ञानप्रतिबन्धाभावेन विरोधित्वनियमाभावादिति दिक् ।

अथ कोऽयमुपाधिर्नाम, उच्यते । साध्यव्यापकः साधनाव्यापकोऽयमुपाधिः, यथा 'धूमवान् वह्नेरि'त्यादौ आर्द्रेन्धनम्। तद्धि साध्यस्य धूमस्य व्यापकं, 'यत्र यत्र धूमस्तत्र तत्रार्द्रेन्धनमि'ति व्याप्तेः । साधनस्य वह्नेरव्यापकं च, 'यत्र यत्र वह्निस्तत्र तत्रार्द्रेन्धनमि'ति व्याप्तेरभावात् । अयोगोलकादौ वह्नेः सत्त्वेऽप्यार्द्रेन्धनाभावात् । यथा वा 'सत्सु मित्रातनयेषु श्यामेषु दृष्टेषु कश्चिद् गर्भस्थेऽपि मित्रातनये श्यामत्वं मित्रातनयत्वेना-

नुमिनोति 'स श्यामो मित्रातनयत्वादि'ति । अत्र शाकपाकजत्वमुपाधिः । अत्र यद्यपि 'यत्र यत्र श्यामत्वं तत्र तत्र शाकपाकजत्वमि'ति नियमो नास्ति, घटादौ श्यामत्वसत्त्वेऽपि शाकपाकजत्वाभावात । तथापि मित्रातनयत्वविशिष्टश्यामत्वं यत्र, तत्र शाकपाकजत्वमिति नियमोऽस्त्येव । अत एवायं साधनावच्छिन्नसाध्यव्यापक इति गीयते । एवं 'वायुः प्रत्यक्षः प्रमेयत्वादि'त्यत्रोद्भूतरूपवत्त्वमुपाधिः । अत्र यद्यपि 'यत्र यत्र प्रत्यक्षत्वं तत्र तत्रोद्भूतरूपवत्त्वमि'ति नियमो नास्ति, आत्मादौ व्यभिचारात्, तथापि बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वं यत्र घटादौ तत्रोद्भूतरूपवत्त्वमस्त्येव । अत एवायं पक्षधर्मावच्छिन्नसाध्यव्यापक इति वदन्ति । ईदृशोपाधिज्ञाने सति हेतौ साध्यव्यभिचारज्ञानमुपजायते । ततो व्याप्तिज्ञानविरह इत्येषा दिक् ॥

इत्यनुमानखण्ड ।

---

अथोपमानखण्डः ।

अथोपमितिः । गवयपदार्थमजानानो नागरिकः पुरुषः कुतश्चिदारण्यकपुरुषाद् गोसदृशो गवयशब्दवाच्य इति श्रुत्वारण्यं गतो गोसदृशं पिण्डं पश्यति 'अयं गोसदृश' इति । ततो 'गोसदृशो गवयपदवाच्य' इत्यतिदेशवाक्यार्थं स्मरति । अनन्तरं तस्य 'अयमसौ गवयपदवाच्य'इति ज्ञानं जायते । अत्र गोसादृश्य-

---

१. 'शब्दार्थं' ख. पाठ २. 'शब्दवा' ग पाठ

विशिष्टपिण्डे गवयपदवाच्यताज्ञानं यदुत्पद्यते, तदेवोपमितिः। अस्यां गोसादृश्यज्ञानं करणम्। एतदेवोपमितिकरणत्वादुपमानमिति वदन्ति। 'गोसदृशो गवयपदवाच्य' इत्यतिदेशवाक्यार्थस्मरणं व्यापार इति संक्षेपः॥

इत्युपमानखण्ड ।

---

अथ शब्दखण्डः ।

अथ शाब्दबोधो निरूप्यते। पदज्ञानं तत्र करणम्। पदजन्यपदार्थोपस्थितिरवान्तरव्यापारः। गामानयेत्यादिशब्दाद् गोकर्मकमानयनं कार्यमिति यद् ज्ञानं जायते, तदेव फलम्। ननु किं पुनः पदम्। वृत्तिमत् पदम्। वृत्तिश्च शक्तिलक्षणान्यतरः पदपदार्थयोः सम्बन्धः। अथ केयं शक्तिः। उच्यते। 'अस्माच्छब्दादयमर्थो बोद्धव्य इत्याकारिकेश्वरेच्छे'ति प्राञ्चः। नवीनास्तु—अतिरिक्तपदार्थ एव शक्तिरिति वदन्ति। नन्वेवं पामराणामर्थमविदुषामपि शब्दादर्थप्रत्ययः स्यादिति चेद्, न, तेषां पदश्राविणामपि पदार्थोपस्थितिविरहेण वाक्यार्थबोधानुत्पत्तेः। पदार्थोपस्थितिविरह एव तेषां कुत इति चेत्, शक्तिग्रहवैधुर्यादिति गृहाण। अथ कथं शक्तिग्रहः पदानाम्। उच्यते। 'घटमानये'ति प्रयोजकवृद्धस्य वाक्यश्रवणानन्तरं प्रयोज्यवृद्धस्य घटानयनगोचरप्रवृत्तिं तदीयचेष्टयोपलभमानो व्युत्पित्सुर्बालस्तया प्रवृत्त्या तद्धेतुभूतं ज्ञानमनुमिनोति। अनन्तरं तस्य

ज्ञानस्य कारणमन्वेषमाणो वाक्यश्रवणात् प्रागजातत्वात् तस्मिन् सति जातत्वाचान्वयव्यतिरेकाभ्यां पदसमुदायरूपवाक्यस्य कारणतामवधारयति । ततो घटादिपदानामावापोद्वापाभ्यां कम्बुग्रीवादिमच्छक्यविशेषे शक्तिं कल्पयति । अयमेव व्यवहाराच्छक्तिग्रह इत्युच्यते । एवं गृहीतशक्तिकतत्समानार्थकपदान्तरेण तदर्थकथनं विवरणम् । ततोऽपि शक्तिग्रहः । यथा घटोऽस्तीत्यस्य कलशोऽस्तीति विवरणेन घटपदशक्तिग्रहः । एवमन्येऽपि व्याकरणादयः शक्तिग्रहोपाया मूलग्रन्थेषु द्रष्टव्याः । एवं शक्त्यनुभवे जाते कालान्तरे घटादिपदश्रवणेन शक्त्यनुभवजन्यसंस्कारोद्बोधेन शक्तिस्मरणात् पदार्थोपस्थितिः । नन्वेवं देशान्तरस्थितस्य काश्यां गौरस्ति इति वाक्याद् बोधो न स्यात्, तस्याः प्रागनुपस्थितत्वेन तत्र शक्तिग्रहाभावादिति चेद्, उच्यते । व्यवहारादिना शक्तिग्रहवेलायां गोत्वादिसामान्यलक्षणप्रत्यासत्त्या उपस्थितसर्वगवीषु शक्तिग्रहेणोक्तदोषाभावात् । सा च शक्तिः पदानां जातिविशिष्टव्यक्ताविति प्राञ्चः । नव्यास्तु—विशिष्टे न शक्तिः, गौरवात्, किन्तु व्यक्तिमात्रे । जातिस्तु शक्यतावच्छेदिकेत्याहुः । मीमांसकास्तु—व्यक्तौ न शक्तिः । तासामानन्त्यादनन्तशक्तिकल्पनापत्तेः, किन्तु जातौ, तस्या एकत्वात् । न चैवं पदाद् व्यक्तिबोधो न स्यादिति वाच्यम् । जातिर्हि व्यक्तिं विनानुपपन्नेत्यनुपपत्तिरूपाक्षेपाद् व्यक्तिबोधसंभवादित्याहुरिति संक्षेपः ।

शक्तं पदं चतुर्विधं यौगिकं रूढं योगरूढं यौगिकरूढं चेति । यत्र

समुदायशक्तिं विनावयवशक्त्या पदार्थोपस्थितिः तद् यौगिकं, यथा पाचकादिपदम् । अत्र न प्रकृतिप्रत्ययसमुदायस्य कश्चिद् रूढिरस्ति। किन्तु प्रकृतिप्रत्ययशक्तिभ्यां पाककर्तुरुपस्थितिः। यत्रावयवशक्तिनैरपेक्ष्येण समुदायशक्त्यैव पदार्थोपस्थितिः तद् रूढं, यथा गवादिपदम् । अत्र प्रकृतिप्रत्ययनैरपेक्ष्येण समुदायशक्त्या सास्नादिमद्व्यक्तिविशेषस्य गवादिपदादुपस्थितिः । यत्र तु समुदायावयवशक्तिभ्यामेकार्थोपस्थितिः तद् योगरूढं, यथा पङ्कजादिपदम् । अत्र ह्यवयवशक्त्या पङ्कजनिकर्तृत्वस्योपस्थितिः, समुदायशक्त्या च पद्मत्वस्य । अत्रावयवशक्तिमात्राभ्युपगमे पङ्कजादिपदात् पङ्कजनिकर्तुर्मण्डूकादेरपि बोधप्रसङ्गः । समुदायशक्तिमात्राभ्युपगमे पङ्कजनिकर्तृ पद्ममिति पङ्कजनिकर्तृत्वप्रकारकबोधानुपपत्तिः । अतः शक्तिद्वयं पङ्कजादिपदेष्वभ्युपेयम् । यत्र योगेनान्यार्थस्य रूढ्या चान्यस्योपस्थिति. तद् यौगिकरूढं, यथोद्भिदादिपदम्। अत्र योगेनोर्ध्वविदारणकर्तुः खनित्रादे· रूढ्या च यागविशेषस्योपस्थितिरिति संक्षेपः ।

ननु पदज्ञानस्य पदार्थोपस्थितिजनकत्वं कथमिति चेद्, उच्यते । एकसम्बन्धिज्ञानमपरसम्बन्धिज्ञाने हेतुः । (यथा?) हस्तिनि दृष्टे हस्तिपकस्मरणदर्शनात् । प्रकृते च पदतदर्थयोर्वाच्यवाचकभावरूपसम्बन्धवत्त्वेन एकसम्बन्धिनः पदस्य ज्ञाने सत्यपरसम्बन्धिनः पदार्थस्य स्मरणं भवतीति न किञ्चिदनुपपन्नम् । लक्षणा तु शक्यसम्बन्धः, यथा गङ्गायां घोष इत्यादौ

गङ्गादिपदे। अत्र शक्यार्थस्य प्रवाहस्य घोषाधिकरणत्वं न सम्भवतीति अनुपपत्तिज्ञाने सति गङ्गापदेन स्वशक्यार्थप्रवाहसम्बन्धि तीरमुपस्थाप्यते। ततस्तीरे घोष इति वाक्यार्थबोध इत्येषा दिक्।

अथ देवदत्तस्तण्डुलं पचतीत्यादौ किंविशेष्यकः किंप्रकारको बोध इति चेत्, प्रथमान्तविशेष्यको बोध इति गृहाण। तथाहि—देवदत्तपदाद् देवदत्तस्य, तण्डुलपदात् तण्डुलस्य, द्वितीयया कर्मत्वस्य, धातुनाधिश्रयणादेर्व्यापारस्य, लकारेण कृतेः, एकवचनेनैकत्वादेश्चोपस्थितिः। अनन्तरं तण्डुलस्य द्वितीयार्थकर्मत्वे आधाराधेयभावसम्बन्धेन, कर्मत्वस्य जनकत्वसंसर्गेण धात्वर्थे, तस्य जनकत्वसंसर्गेणाख्यातार्थकृतौ, तस्याश्चैकत्वस्य च समवायसम्बन्धेन देवदत्तेऽन्वयबोधः। तण्डुलवृत्तिविक्लित्तिजनकाधिश्रयणादिव्यापारानुकूलकृतिमान् देवदत्त एक इत्याकारकोऽन्वयबोधो जायते। अन्वयबोध एव वाक्यार्थबोध इत्युच्यते। ननु क्रियाजन्यफलशालित्वं कर्मत्वं, यथा तण्डुलं पचतीत्यादौ तण्डुले। अत्र पाकक्रियाजन्यफलं विक्लित्तिरवयवानां प्रशिथिलसंयोगः, तदाश्रयस्तण्डुल इति स कर्म। तथा चेदृशकर्मत्वस्य जनकतासंसर्गेण कथं धात्वर्थेऽन्वयः। उच्यते। क्रिया तावद् धातुना लभ्यते। जन्यत्वाश्रयत्वयोः संसर्गमर्यादया लाभः। अतः फलमनन्यलभ्यत्वाद् द्वितीयार्थः। अतस्तस्य जनकतासंसर्गेण क्रियायामन्वयो युक्त एव। मीमांसकास्तु—आख्यातार्थभावनाशब्दितकृतिविशेष्यकस्तण्डुलवृत्तिविक्लित्तिजनकपाकानुकूला कृतिरेकदेवदत्ताश्रितेत्याकारको बोध इति वदन्ति।

वैयाकरणास्तु—सत्यं कृतिविशेष्यको बोध इति। किन्तु कृतिरपि धात्वर्थ इति धात्वर्थविशेष्यक एव बोधः । न चैवमाख्यातार्थः क इति वाच्यम्। कर्तृकर्मभावानामेव यथायथमाख्यातार्थत्वात्। तस्मिंश्चाख्यातार्थे कर्त्रादौ प्रथमान्तोपस्थाप्यस्य देवदत्तादेरभेदान्वयः । तथा च देवदत्ताभिन्नकर्तृकः पाकस्तण्डुलवृत्तिविक्लित्तिजनक इति बोध इत्याहुः ।

देवदत्तेन तण्डुलाः पच्यन्त इत्यादिकर्मलकारेऽपि देवदत्तादेः प्रातिपदिकार्थस्य तृतीयार्थकृतौ, तस्या जन्यतासम्बन्धेन पाके, तस्य चाख्यातार्थे फले जन्यत्वसंसर्गेण तस्य चाधारतासंसर्गेण प्रथमान्तपदोपस्थाप्येषु तण्डुलेष्वन्वये देवदत्ताश्रितकृति(जन्य)पाकजन्यविक्लित्तिशालिनस्तण्डुला इति बोधः । एवं मीमांसकादिमतेऽपि बोधप्रकारः प्राग्वदुन्नेयः । विस्तरस्त्वाख्यातशिरोमण्यादौ द्रष्टव्य इत्येषा दिक् ।

नन्वेवं घटः कर्मत्वमानयनं कृतिरित्यादितोऽपि घटमानयतीत्यादित इव शाब्दबोधः कुतो न भवतीति चेद्, आकाङ्क्षानिश्चयाभावादिति गृहाण। अथ केयमाकाङ्क्षा। उच्यते। यत्पदस्य यत्पदव्यतिरेकप्रयुक्तमन्वयबोधाजनकत्वं तत्पदं तत्पदेन साकाङ्क्षम् । यथा क्रियापदं कारकपदाभावे नान्वयबोधं जनयति, तथा कारकपदमपि क्रियापदव्यतिरेके। अतस्तयोः परस्परमाकाङ्क्षा । एवं प्रातिपदिकं विभक्तिव्यतिरेकेण नान्वय-

बोधकं, तथा धातुपदमाख्यातव्यतिरेकेण । अतस्तयोर्द्वयोः[1] परस्परसाकाङ्क्षत्वम् । एवञ्च घटः कर्मत्वमित्यादौ घटपदोत्तरं द्वितीयादिसमभिव्याहारस्य धातूत्तरमाख्यातसमभिव्याहारस्य चाभावेनाकाङ्क्षाविरहान्नान्वयबोध इति । नन्वेवमपि वह्निना सिञ्चतीत्यादितोऽपि वाक्यार्थबोधप्रसङ्गः, आकाङ्क्षानिश्चयसत्त्वादिति चेद्, न । योग्यताज्ञानस्यापि तत्र कारणतया तत्र तदभावेनोक्तदोषाभावात् । योग्यता चैकपदार्थेऽपरपदार्थसम्बन्धः। यथा—घटमानयेत्यादौ घटपदार्थे द्वितीयाविभक्त्यर्थकर्मत्वस्याधाराधेयभावरूपान्वयवत्त्वाद् घटकर्मत्वयोराधाराधेयभावलक्षणसंसर्गबोधः । न च वह्निना सिञ्चतीत्यादावुक्तरूपयोग्यतास्ति, वह्निरूपपदार्थे सेककरणत्वरूपतृतीयार्थसम्बन्धाभावादिति संक्षेपः ।

पदजन्यपदार्थोपस्थितिरासत्तिः । अत एव प्रत्यक्षोपस्थितं कलायादिकमादाय न शाब्दबोधः । सा च शाब्दबोधे[2] कारणम् । नन्विदमसङ्गतं, पदज्ञानात् पदार्थोपस्थितेरसम्भवात् । तथाहि—वर्णास्तावदनित्या इत्यग्रे व्यवस्थापयिष्यते । क्रमिकवर्णसमुदायश्च पदम् । ततश्चोत्तरोत्तरवर्णैः पूर्वपूर्ववर्णानां विनाशेन एकदा वर्णसमुदायरूपपदस्याभावेन तद्ग्रहणं न सम्भवति । इत्थञ्च पदज्ञानरूपकारणविरहे कथं पदार्थोपस्थितिरिति चेद्, उच्यते । पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहकृतेन श्रोत्रेन्द्रियेणा-

१. 'र्यो प' ग. पाठ. २. 'ध' ख. पाठ.

न्त्यवर्णांशे लौकिकस्य पूर्ववर्णांशेऽलौकिकस्य पदप्रत्यक्षस्य सम्भवेन पदार्थोपस्थितेः सम्भवादिति संक्षेपः ।

नानार्थसैन्धवादिपदप्रयोगेऽर्थविशेषतात्पर्यनिश्चयविरहे वाक्यार्थबोधानुदयात् तात्पर्यनिश्चयोऽपि तत्र कारणम् । तात्पर्यं च तत्प्रतीतीच्छयोच्चारितत्वम् । इदं च प्रकरणादिना निर्णीयते । एवञ्च सैन्धवमानयेत्यादौ भोजनप्रकरणनिर्णये सैन्धवादिपदस्य लवणादितात्पर्यनिश्चये लवणान्वयबोधः, गमनप्रकरणनिर्णये तुरगादिपरत्वनिश्चये तुरगान्वयबोधः । अत एव नानार्थस्थले तात्पर्यनिर्वाहार्थमीश्वरः कल्प्यते । सर्गाद्यकाले तदन्यस्य वक्तुरसंभवात् । न च प्रलये मानाभावेन सर्गाभावेऽ(वा?)विच्छिन्नाध्यापकपरम्परामादायैव तात्पर्यनिर्वाहसंभवात् किमीश्वरेणेति वाच्यम् । प्रलयस्यागमप्रतिपाद्यत्वेन सर्गादावध्यापकासंभवेनेश्वरस्यैव वक्तव्यत्वादिति संक्षेपः ॥

इति शब्दखण्डः ।

---

एवमनुभवस्य चतुर्विधतया तत्करणानामपि चातुर्विध्याच्चत्वारि प्रमाणानि । तथा च भगवानक्षपादः—प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति[2] । नन्विदमनुपपन्नम्, अर्थापत्तेरप्यतिरिक्तप्रमाणस्य सद्भावात् । तथाहि—शतवर्षजीवी देवदत्त

1. 'दा' ग. पाठ 2. 'भि । न' ख. पाठ.

इति ज्योतिःशास्त्रात् शतवर्षजीवित्वनिश्चयेऽनन्तरं देवदत्तस्य गृहेऽभावनिश्चये गृहासतो देवदत्तस्य शतवर्षजीवित्वं वहिःसत्त्वं विनानुपपन्नमित्यनुपपत्तिज्ञाने सति वहिःसत्त्वज्ञानं जायते। अत्र वहिःसत्त्वज्ञानस्य प्रत्यक्षादिप्रमाणैरसम्भवात् तज्जनकमनुपपत्तिज्ञानमिति कल्प्यते। तदेव चार्थापत्तिरिति चेद्, न। देवदत्तो वहिः सन्, शतवर्षजीवित्वे सति गृहासत्त्वाद्, यो न वहिः सन् स न शतवर्षजीवित्वे सति गृहासन्, यथा गृहे विद्यमानो मृतो वा, न चायं तथा, तस्मान्न तथेति व्यतिरेकिणैव वहिःसत्त्वज्ञानस्य संभवेनातिरिक्तप्रमाणकल्पने गौरवान्मानाभावाच्च। अनुपलब्धेर्व्यापाराभावेन करणत्वाभावादिति प्रमाणत्वं प्रागेव निरस्तमिति संक्षेपः।

पुनश्च ज्ञानमनुभूतिरूपं प्रकारान्तरेण द्विविधं प्रमाप्रमाभेदात्। तत्र तद्वति तत्प्रकारकानुभवः प्रमा। यथा इदं रजतमिति[२] रजतज्ञानम्। इदं हि रजतत्ववति रजतत्वप्रकारकम्। अत एव शुक्तौ रजतज्ञानं न प्रमा, रजतत्ववति रजतत्वप्रकारकत्वाभावात्[३]। स घट इत्यादिस्मरणस्य घटत्ववति घटत्वप्रकारकत्वेऽपि न प्रमात्वं, तस्यानुभवत्वाभावात्। तदभाववति तत्प्रकारकं ज्ञानमप्रमा। यथा शुक्तौ इदं रजतमिति ज्ञानम्। इदं हि रजतत्वाभाववति रजतत्वप्रकारकम्। अप्रमापि द्विविधा संशयविपर्ययभेदात्। तत्रैकधर्मिणि विरुद्धनानाधर्मसम्बन्धाव-

१ 'नस' ख पाठ २. 'ति ज्ञा' ग पाठ ३. 'काभा' ख. पाठ.

गाहि ज्ञानं संशयः । स त्रिविधः । साधारणधर्मदर्शनजोऽसाधारणधर्मदर्शनजो विप्रतिपत्तिजश्चेति । तत्राद्यो यथा—मन्दान्धकारे इन्द्रियसन्निकृष्टे ऊर्ध्वताशालिनि पिण्डे स्थाणुपुरुषसाधारणोर्ध्वत्वधर्मदर्शनात् किमयं स्थाणुः पुरुषो वेति ज्ञानं जायते । अत्रेन्द्रियसन्निकृष्टे पुरोवर्तिनि धर्मिणि स्थाणुत्वपुरुषत्वरूपविरुद्धनानाधर्मवैशिष्ट्यावगाहनादिदं ज्ञानं संशयः । द्वितीयो यथा—नित्यादनित्याच्च व्यावृत्तस्य शब्दत्वस्यासाधारणधर्मस्य दर्शनात्[2] शब्दो नित्यो न वेति सन्देहः । तृतीयो यथा—वेदः पौरुषेय इति कस्यचिद् वादिनो वाक्यात् पौरुषेयत्वस्य सोऽपौरुषेय इति कस्यचिद् वाक्यादपौरुषेयत्वस्य चोपस्थितौ मध्यस्थ[3]स्य वेदः पौरुषेयो न वेति संशयो जायते । सर्वत्र संशये धर्मिज्ञानं कोट्युपस्थितिश्च हेतुः । विपर्ययो यथा—देहादावहंमतिः शुक्त्यादौ रजतादिज्ञानं वा । यद्यपि संशयविपर्ययर्योर्द्वयोरप्यप्रमात्वमविशिष्टं, तथापि विपर्यये निर्णयत्वं विशेषः । निर्णयत्वं च तदभावाप्रकारकत्वे सति तत्प्रकारकत्वम् । संशये हि भावाभावयोर्द्वयोरपि प्रकारत्वेन नोक्तरूपनिर्णयत्वम् । मीमांसकास्तु—अज्ञातार्थगोचरज्ञानं प्रमेत्याहुः, प्रमात्वं च स्वतो ग्राह्यमि[4]ति । तथाहि—येनैव ज्ञानं गृह्यते तेनैव तद्गतं प्रमात्वमपि । ज्ञानं च मुरारिमतेऽनुव्यवसायेन गृह्यते । इदं रजतमिति व्यवसायानन्तरम् इदं रजतं जानामीत्यनुव्यव-

१ 'सा' ख पाठः. २. 'र्शन स्यास्' ख. पाठः ३ 'स्थस्य' ख पाठः
४. 'ति । ये' ख पाठः.

सायों मनसा जायते। अत्र ज्ञाने रजतत्वं विषयः। तस्मिंश्च गृह्यमाणे तद्गतं तद्वति तत्प्रकारकत्वमपि गृह्यते। भट्टमते तु—ज्ञानमतीन्द्रियं ज्ञानजन्यज्ञाततयानुमीयते। न च ज्ञाततायां मानाभावः। घटादिज्ञानानन्तरं मया घटो ज्ञात इत्याद्यनुभवस्यैव प्रमाणत्वात्। न चायमनुभवो ज्ञानविषयत्वमवगाहते, न तु तद्व्यतिरिक्तज्ञातताामिति वाच्यम्। ज्ञानविषयत्वातिरिक्तज्ञातताानङ्गीकारे घटं जानामीत्यादौ[2] घटादेर्ज्ञानक्रियाजन्यफलशालित्वविरहेण कर्मत्वाभावप्रसङ्गात्। अतो ज्ञानजनितज्ञाततारूपलिङ्गेन घटादिज्ञानेऽनुमीयमाने स्वगतं प्रमात्वमपि गृह्यत इति। गुरुमते[3] तु—ज्ञान स्वप्रकाशम्। स्वप्रकाशत्वं च स्वविषयकत्वम्। सर्वं हि ज्ञानं घटमहं जानामीत्याद्याकारमुत्पद्यते। अत्र च ज्ञाने मितिरूपज्ञानस्य, मेयरूपस्य घटस्य, मातुश्चाहमर्थस्य, भानाद् मितिमातृमेयविषयत्वं ज्ञानस्येति तदीयो राद्धान्तः। सोऽयं त्रिपुटीप्रत्यक्षवादः। तथा च घटादिज्ञानेन स्वस्वरूपे गृह्यमाणे स्वगतं प्रमात्वमपि गृह्यते। अतो मतत्रयेऽपि प्रमात्वस्य ज्ञानग्राहकसामग्रीग्राह्यतया स्वतस्त्वसिद्धिरिति। तदिदं मीमांसकमतमनुपपन्नम्। ज्ञाने गृह्यमाण एव तद्गतप्रमात्वस्यापि ग्रहणेऽनभ्यासदशोत्पन्नरजतादिज्ञाने ममोत्पन्नं रजतादिज्ञानं प्रमा न वेति प्रामाण्यसंशयो न स्यात्। संशये हि धर्मिज्ञानं कारणम्। तथा च प्रकृते संशये[4] धर्मिणो ज्ञानस्य संशयात् प्राग् ग्रहणे तद्गतप्रमात्वस्यापि निश्चितत्वेन संशयानुपपत्तिः।

---

१ 'यम' ग पाठ २ 'ती' ख पाठ ३. 'ते ज्ञा' ख पाठ ४ 'य' ग पाठ

निश्चयस्य संशयप्रतिबन्धकत्वात् । ज्ञानस्य प्रागग्रहणे धर्मिज्ञानरूपकारणाभावेन संशयानुपपत्तिरिति सर्वसाधारणो दोषः । मुरारिमतेऽनुव्यवसायस्य व्यवसायविषयकत्वेन व्यवसायानुपनीतस्य प्रामाण्यस्य कथमनुव्यवसाये भानमित्यपरो दोषः । भट्टमतेऽपि ज्ञानजन्यज्ञाततायां मानाभावेन तया ज्ञानग्रहणानुपपत्तिः । न च घटो ज्ञात इत्यादिप्रत्यय एव तत्र मानमिति वाच्यम् । तस्य ज्ञानविषयत्वावगाहित्वात् । घटं जानामीत्यादौ[1] विषयत्वस्यैव द्वितीयार्थत्वात् । अतीतादौ विषयाभावेन तदाश्रितज्ञाततासम्भवेन विषयताया एव त्वया तत्र वाच्यत्वादित्यपरो दोषः । गुरुमतेऽपीन्द्रियस्य सन्निकृष्टार्थग्राहकत्वेन चक्षुरादिना सममात्मज्ञानयोरसन्निकर्षेण तेन तयोर्ग्रहणानुपपत्त्या स्वप्रकाशत्वासम्भवादिति दोषान्तरमिति संक्षेपः । तर्हि केन प्रमात्वं गृह्यत इति चेद्, अनुमानेनेति गृहाण । तथाहि—अनभ्यासदशोत्पन्नरजतादिज्ञानानन्तरं रजतार्थी पुरुषः प्रवर्तते । ततस्तत्र रजतादिप्रतिलम्भे ममोत्पन्नं रजतादिज्ञानं प्रमा, संवादिप्रवृत्तिजनकत्वाद्, यन्नैवं तन्नैवं, यथा शुक्तिरजतादिज्ञानं, न चेदं तथा, तस्मान्न तथेति केवलव्यतिरेकिणा प्रमात्वं गम्यत इति संक्षेपः । गुरवस्तु—प्रमालक्षणे तद्वद्विशेष्यकत्वं विशेषणं व्यर्थम्, अयथार्थज्ञानस्यैवाभावेन व्यावर्त्याप्रसिद्धेः, सामग्र्यभावेनान्यथाख्यात्यनुपपत्तेः । द्रव्यसमवेतचाक्षुषे हि चक्षुःसंयुक्तसमवायघटिता सामग्री । न च शुक्तौ रजतत्वादिप्रत्यक्षहेतुः संयुक्तसम-

---

१ 'ती' स. पाठः.

वायलक्षणः सन्निकर्षोऽस्ति । न चैवं शुक्तौ रजतार्थिप्रवृत्तिर्न स्यात्, प्रवर्तकस्य पुरोवर्तिविशेष्यकेष्टतावच्छेदकप्रकारकज्ञानस्याभावादिति वाच्यम्। पुरोवर्तिनीष्टभेदाग्रहस्यैव प्रवृत्तिजनकत्वात्। न चैवं लोके भ्रमशब्दस्यापार्थकत्वप्रसङ्गः, ग्रहणस्मरणात्मकस्य ज्ञानद्वयस्यैव भ्रमशब्दार्थत्वादित्याहुः। तन्न। प्रमास्थले हि विशिष्टज्ञानं प्रवृत्तिहेतुरिति निर्णीतम्। ततश्च क्लृप्तहेतुना तेन विना भ्रमस्थले प्रवृत्तिर्न स्यात्। न च भेदाग्रहस्य प्रवृत्तिहेतुत्वम्। लाघवेन पुरोवर्तिनीष्टाभेदग्रहस्यैव जनकत्वात्। न च सन्निकर्षविरहेणान्यथाख्यात्यसम्भवः। स्मर्यमाणारोपे ज्ञानस्य सन्निकर्षस्य, अनुभूयमानारोपस्थले लौकिकसन्निकर्षस्य(च) सम्भवेन सन्निकर्षविरहासिद्धेः दोषबलादसन्निकृष्टभानसम्भवाच्च। वेदान्तिनस्तु—पुरोदेशे रजतं साक्षात्करोमीत्यनुभवबलेन दोषसहकृतज्ञानसामग्र्या पुरोदेशे तात्कालिकं रजतमुत्पद्यत इत्याहुः। तदपि न। क्लृप्तरजतावयवतत्संयोगादिरूपकारणविरहेण तत्र रजतोत्पादायोगात्, प्रतिपुरुषं भिन्नभिन्नरजतादेस्तद्धूसादेश्च कल्पने गौरवाद्, ज्ञानसामग्र्या अर्थजनकत्वानुपपत्तेश्चेति संक्षेपः। माध्यबौद्धादयस्तु—असदेव रजतं दोषबलाद् भासत इत्याहुः। तदप्यशुद्धम्। असतो भानासम्भवात्। न च दोष एव तत्र नियामक इति वाच्यम्। दोषो हि सादृश्यादिरूपः। न चासतः सादृश्यादिकमस्ति। तस्य निरुपाख्यत्वेनाधारत्वानुपपत्तेरिति दिक्। आन्तरमेव रजतं वाह्यतया भातीत्यात्मख्याति-

---

१ 'रज्ञा' ग पाठ  २ 'ष्टाभेदग्र' ग पाठ  ३ "चाभेदग्र' ग पाठ

वादिनः । तदप्यनुभवपथं नारोहति । रजतादेर्बाह्यत्वानुभवविरोधात् । न च दोषात् तथा भानमिति वाच्यम । दोषाभावे कदाचिदान्तरत्वानुभवप्रसङ्गादिति सिद्धान्यथाख्यातिरिति कृतं पल्लवेन । अस्यां चान्यथाख्यातावसाधारणकारणं दोषः । स चाननुगतः । कचित् पित्तं, यथा शङ्खे पीतताभ्रमे । वंशोरगभ्रमे मण्डूकवसाञ्जनमित्यादि । प्रमायां चासाधारणकारणं गुणः । तत्र प्रत्यक्षे विशेषणवद्विशेष्येन्द्रियसन्निकर्षो गुणः । अनुमितौ साध्यवति पक्षे परामर्शः, उपमितौ सादृश्यप्रमा, शाब्दबोधे योग्यताप्रमा तात्पर्यप्रमा चेति । अत एव प्रमायां ज्ञानसामान्यसामग्र्यतिरिक्तगुणजन्यत्वोत्पत्तावपि तस्याः परतस्त्वमिति संक्षेपः ॥

इति प्रामाण्यवाद ।

---

सुखत्वजातिमत् सुखव्यवहारासाधारणकारणं वा गुणः सुखम् । तच्च सर्वेषामभिलषितम् । अत एव तस्य स्वतः पुरुषार्थत्वम् । तत्र च धर्मोऽसाधारणकारणम् ।

दुःखत्वजातिमद् दुःखव्यवहारासाधारणकारणं वा गुणो दुःखम् । तच्च सर्वेषां प्रतिकूलवेदनीयम । अत एव तत्यद्वेषविषयः । तत्र चाधर्मो निमित्तम् ।

---

१. 'प्रमुगत' ग. पु.

इच्छात्वजातिमती इच्छाव्यवहारासाधारणकारणं वा गुण इच्छा । सा च द्विविधा उपायेच्छा फलेच्छा चेति । तत्रौदनाद्युपाये पाकादाविच्छा उपायेच्छा । अस्यां च फलेच्छा इष्टसाधनताज्ञानं बलवदनिष्टाजनकत्वज्ञानं चेति त्रयं कारणम् । अत एव फले वीतरागस्य सत्यपीष्टसाधनताज्ञाने सत्यपि च बलवदनिष्टाजनकत्वज्ञाने न पाकादाविच्छा । एवं सत्यामपि फलेच्छायामिष्टसाधनताज्ञानाभावे बलवदनिष्टाजनकत्वज्ञानसत्त्वेऽपि नेच्छा । मधुविषसम्पृक्तान्नभोजनादौ फलेच्छेष्टसाधनताज्ञानयोः सत्त्वेऽपि नेच्छा, तत्र बलवदनिष्टजनकत्वज्ञानात् । फलेच्छायां फलज्ञानं कारणम् । फलं च सुखं दुःखाभावस्तत्साधनं चेति ।

द्वेषत्वजातिमान् द्वेषव्यवहारासाधारणकारणं वा द्वेषः । सोऽपि दुःखतदुपायगोचरत्वेन द्विविधः । तत्राद्ये दुःखज्ञानं हेतुः, द्वितीये दुःखजनकताधीरिति ।

यत्नत्वजातिमान् यत्नव्यवहारासाधारणकारणं वा यत्नः । स त्रिविधः प्रवृत्तिनिवृत्तिजीवनयोनिभेदात् । तत्र प्रवृत्तौ चिकीर्षा हेतुः । चिकीर्षा च कृतिसाध्यविषयिणी कृतिसाध्यत्वप्रकारिकेच्छा, पाकं कृत्वा साधयामीति तदनुभवात् । अस्यां च कृतिसाध्यत्वज्ञानमिष्टसाधनत्वज्ञानं बलवदनिष्टाजनकत्वज्ञानं च हेतुः । ततश्च एतत्त्रितयज्ञानं चिकीर्षाद्वारा प्रवृत्तौ जन-

---

१ 'मान् इ' ग पाठ  २ 'विरा' ख पाठ  ३ 'नी' ख. पाठ.

कम् । अत एव चन्द्रमण्डलाहरणादाविष्टसाधनताज्ञानबलवदनिष्टाजनकत्वज्ञानसत्त्वेऽपि न प्रवृत्तिः, तत्र कृतिसाध्यताज्ञानाभावात् । अत एव च मण्डलीकरणादौ कृतिसाध्यत्वबलवदनिष्टाजनकत्वज्ञानसत्त्वेऽपि न प्रवृत्तिः, तत्रेष्टसाधनताज्ञानाभावात् । न वा मधुविषसम्पृक्तान्नभोजने कृतिसाध्यत्वेष्टसाधनत्वज्ञानसत्त्वेऽपि प्रवृत्तिः । तस्य मरणरूपबलवदनिष्टजनकतया तदजनकत्वज्ञानाभावात् । प्राभाकरास्तु—इच्छायाः स्वसमानप्रकारकज्ञानसाध्यत्वेन कृतिसाध्यत्वप्रकारकेच्छारूपायां चिकीर्षायां कृतिसाध्यत्वप्रकारकमेव ज्ञानं जनकम् । अतस्तदेव प्रवर्तकं, न त्विष्टसाधनतादिज्ञानं, तस्य भिन्नप्रकारकत्वाद्, नित्ये सन्ध्यावन्दनादौ फलाभावेनेष्टसाधनताज्ञानासम्भवाच्च । नित्यनैमित्तिकयोर्हि ब्रह्मलोकप्राप्त्यादिश्रवणं स्तुतिमात्रम् । अन्यथा काम्य इव नित्यादावपि कामनाधीनकर्तव्यतापत्तेः । नित्यस्थले हि पण्डापूर्वं फलम् । अतो न निष्फलत्वात् सन्ध्यावन्दनादौ प्रवृत्त्यनुपपत्तिरिति । तन्न । कृतिसाध्यत्वप्रकारकज्ञानमात्रस्य प्रवर्तकत्वे निष्फले चैत्यवन्दनादौ प्रवृत्तिप्रसङ्गाद्, मधुविषसम्पृक्तान्नभोजनादौ प्रवृत्त्यापत्तेश्च । अतः प्रवृत्तौ तदपि द्वयं हेतुः । न च नित्यस्थले तदसम्भवः । तत्रापि फलश्रवणात् । न च तस्य कामनाधीनकर्तव्यतापत्तिः । इष्टत्वात् । न च कामनाभावेऽकरणापत्तिरिति वाच्यम् । अकरणे प्रत्यवायश्रवणेन कामनावश्यकत्वकल्पनात् । सुखदुःखाभावतत्साधनान्यतरत्वाभावेना-

---

१. 'ख' 'ग' पाठः २. 'ख' क पाठ.

पुरुषार्थतया पण्डापूर्वस्य फलत्वानुपपत्तेश्च । तस्य फलत्वे कामनाधीनकर्तव्यतापत्तेस्तौल्याच्चेति संक्षेपः । प्रवर्तकज्ञानविषये च लिङादेः शक्तिरिति लिङादिः प्रवर्तकज्ञानजनक इति गीयते । कौमारिलास्तु — लिङादिनिष्ठाभिधा नामैको व्यापारः । स एव शब्दभावना प्रवर्तनेति चोच्यते । तज्ज्ञानादेव प्रवृत्तिरित्याहुः । आचार्यास्तु — लोके पाकं कुर्यादित्याद्याज्ञादिरूपेच्छा लिङादिना प्रतिपाद्यते । सैवाप्ताभिप्रायशब्देनोच्यते । तज्ज्ञानादेव प्रवृत्तिरिति क्लृप्तत्वाद् वेदेऽपि लिङादिना सैव प्रतिपाद्यते । न च तत्रेश्वरातिरिक्तस्याज्ञा सम्भवतीति विध्यन्यथानुपपत्त्यापीश्वरसिद्धिरिति वदन्ति । निवृत्तिरूपे यत्ने तु बलवदनिष्टसाधनताज्ञानं कारणम् । अत एवाग्निकण्टकादिसम्पर्कान्निवर्तते । नव्यास्तु — प्रवृत्त्यभावेनैव निवृत्तिव्यवहारोपपत्तेः निवृत्त्याख्ययत्ने मानाभाव इत्याहुः । एतौ द्वावपि योग्यौ, अहं प्रवृत्तोऽहं निवृत्त इत्यनुभवात् । जीवनयोनियत्नस्तु प्राणपञ्चकसञ्चारानुमेयो जीवनादृष्टजन्य इति प्राञ्चः । अर्वाचीनास्तु — जीवनयोनियत्न एव नास्ति । न चैवं प्राणपञ्चकसञ्चारानुपपत्तिः । जीवनादृष्टेनैव तस्योपपत्तेरित्याहुः ।

गुरुत्वव्यवहारासाधारणकारणं गुरुत्वम् । तच्च पतनासमवायिकारणम् । अवयवगुरुत्वमवयविगुरुत्वेऽसमवायि । नित्यगतगुरुत्वं नित्यम् । अनित्येऽनित्यम् । सर्वं च गुरुत्वमतीन्द्रियं पतनानुमेयमिति सम्प्रदायः । लीलावतीकृतस्तु — पाषाणादावधोवच्छेदेन गुरुत्वं प्रत्यक्षमित्याहुः ।

द्रवत्वव्यवहारासाधारणकारणं द्रवत्वम् । तद् द्विविधं नैमित्तिकसांसिद्धिकद्रवत्वभेदात् । तत्र नैमित्तिकद्रवत्वं कचिदग्निसंयोगासमवायिकारणकं क्वचिदवयवद्रवत्वासमवायिकारणकम् । तच्च पृथिवीतेजसोरित्युक्तम् । सांसिद्धिकं जलमात्रवृत्ति । जलपरमाणुगतं नित्यम् । द्व्यणुकादिगतमनित्यम् अवयवद्रवत्वासमवायिकारणकं यावद्द्रव्यभावि च । सर्वं च द्रवत्वं सङ्ग्रहसाधनम् ।

स्नेहत्वजातिमान् गुणः स्नेहः । स च जलमात्रवृत्तिः । नित्यगतो नित्यः, अनित्यगतोऽनित्यः । अवयवस्नेहजन्यश्च ।

संस्कारस्त्रिविधः वेगो भावना स्थितस्थापकश्चेति । तत्र वेगो मूर्तमात्रसमवेत इत्युक्तम् । तस्मिंश्च वेगे नोदनजन्या क्रिया कारणम् । तथाहि—प्रथमं शरादौ नोदनात् क्रिया जायते । ततस्तया क्रियया शरादौ वेगोत्पत्तिः । ततस्तत्कर्मनाशे सति तेन वेगेन शरे कर्मान्तरोत्पत्तिः । तस्मिन् कर्मणि नष्टे पुनरपि तेनैव वेगेन कर्मान्तरोत्पत्तिः । एवमुत्तरदेशपर्यन्तं स एवोत्तरोत्तरं कर्मारभते । शरादेरुत्तरदेशसंयोगाच्च तस्य वेगस्य नाशः । तथाच पारमर्षसूत्रं—'नोदनादाद्यमिषोः कर्म, तत्कर्मकारिताच्च संस्कारादुत्तरं, तथोत्तरमुत्तरं च' (वैशेषिकदर्शनम् आ.५. सू. १७) इति । ततश्चाद्यकर्मजन्यो वेगो एक एवोत्तरसंयोगपर्यन्तं तिष्ठतीति । नैयायिकास्तु—नोदनादिना शरादौ कर्मो-

---

१. 'स एवो' ग. पाठ

त्पत्तिः । तेन कर्मणा शरे वेगः । तेन तत्कर्मनाशे सति वेगान्तरं जन्यते, तेन वेगेन वेगान्तरं, तेन वेगान्तरमिति चरमवेगस्यैवोत्तरसंयोगान्नाशः । आन्तरालिकवेगानां वेगजन्यकर्मणैव नाशः । न चैवमनेकवेगकल्पने गौरवमिति शङ्क्यम् । विहायसि विहङ्गमो द्रुततरं गच्छतीति प्रत्ययेन पूर्ववेगविलक्षणवेगोत्पत्तेः प्रामाणिकत्वादित्याहुः । मीमांसकास्तु — निरन्तरगतिसन्तानस्यैव वेगव्यवहारविषयतया वेगाख्यसंस्कारे मानाभाव इति वदन्ति । भावनाख्यसंस्कारस्त्वात्ममात्रवृत्तिः । स च स्मृतिहेतुः । तत्र च पूर्वानुभवत्वेन कारणता । स चोद्बुद्ध एव स्मृतिहेतुः । उद्बोधकश्च सदृशदर्शनादिरननुगतः । यथोक्तं—सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधका इति प्राञ्चः । दीधितिकारादयस्तु— पुनः पुनः स्मरणादपि दृढतरसंस्कारोत्पादर्शनसम्भवान्नानुभवत्वेन तत्र कारणता। अपि तु स्मृतिसाधारणेन निर्णयत्वेन जनकतेत्याहुः । तन्नाशे क्वचित् फलं क्वचित् कालः क्वचिद् रोगः (कारणम्) इति दिक् । स्थितस्थापकसंस्कारः क्षितिवृत्तिः । स चाकृष्टस्य शाखादेः स्वस्थानप्राप्त्यनुकूलः । नित्यगतो नित्योऽनित्यगतोऽनित्यः । केचिच्चतुर्ष्वपि क्षित्यादिषु स्थितस्थापकसंस्कारमिच्छन्ति ।

धर्मत्वजातिमान् धर्मः । स च सुखासाधारणकारणम् । यागादिविहितक्रियाजन्यस्तद्व्यापारः । तथाहि— यागादेः स्वर्गादिसाधनत्वं श्रूयते । न चाशुविनाशिनः कर्मणः कालान्तरभावि-

१. 'र' ख पाठ २ 'नानुभवा' ग पाठ ३ 'जनकता ख पाठ ,

स्वर्गादिजनकत्वं सम्भव(ती?)ति, तस्य चिरध्वस्तस्य कार्याव्यवहितपूर्ववृत्तित्वाभावात् । अतस्तत्साधनत्वो(प)पादनार्थं व्यापार आवश्यकः । न चैवमपि यागादेः स्वर्गाद्यव्यवहितपूर्ववर्तित्वं नोपपादितमेवेति वाच्यम् । कार्याव्यवहितपूर्वसमये हि स्वस्वव्यापारान्यतरसत्त्वं कारणत्वप्रयोजकम् । तथा च प्रकृते स्वस्यासत्त्वेऽपि स्वव्यापारस्य सत्त्वाद् यागादेः कारणत्वोपपत्तिः । अयमेव धर्मशब्देनोच्यते । तन्नाशे च कर्मनाशाजलस्पर्शादि कारणम् । मीमांसकास्तु — विहितक्रियैव धर्मः । न चैवं विहितक्रियायास्तत्कालमेव नाशात् कालान्तरे स्वर्गाद्यनुत्पादप्रसङ्गः । तस्याः सूक्ष्मरूपेण तावत्कालमवस्थानात् । एतेन कर्मनाशाजलस्पर्शादिनाश्यतापि धर्मस्य व्याख्याता । एवमधर्मोऽपि निषिद्धक्रियायाः सूक्ष्मावस्थेति वदन्ति ।

अधर्मत्वजातिमान् अधर्मः । स च निषिद्धक्रियाजन्यो दुःखासाधारणकारणम् । तत्र प्रमाणं च प्रायश्चित्तशास्त्रम् । तेन हि प्रायश्चित्तनाश्यता पापस्य प्रत्याय्यते । न च निषिद्धक्रियारूपत्वे पापस्य सा युज्यते, तस्याः प्रायश्चित्तं विनैव नाशादित्यतिरिक्तं नरकानुकूलं पापं कल्प्यत इति दिक् ।

शब्दं प्रत्येव। द्वितीयादिशब्दानां तु पूर्वपूर्वशब्दोऽसमवायिकारणम्। अनुकूलपवनादि निमित्तम्। वर्णात्मकस्तु शब्दोऽकारादिः। तदुत्पत्तौ कण्ठादि निमित्तम्। कण्ठाकाशसंयोगोऽसमवायिकारणम्। इदमप्याद्यवर्णं प्रत्येव। द्वितीयादिवर्णानां तु पूर्वपूर्ववर्णोऽसमवायिकारणम्। तस्य च शब्दस्य वीचीतरङ्गन्यायेनोत्पत्तिरिति केचित्। कदम्बगोलकन्यायेनोत्पत्तिरित्यपरे। आद्यादिशब्दानामुत्तरोत्तरशब्दैर्नाशः, अन्त्यस्य तूपान्त्येन सुन्दोपसुन्दन्यायेन नाश इति केचित्। अन्ये तूपान्त्यनाशादन्त्यनाश इति प्राहुः। मीमांसकास्तु—स एवायं गकार इति प्रत्यभिज्ञाबलाद् वर्णात्मकः शब्दो नित्य इत्याहुः। तन्न। उत्पन्नो गकारो विनष्टो गकार इति प्रत्ययबलेन वर्णानामुत्पादविनाशसिद्धेः। न च प्रत्यभिज्ञानुपपत्तिः। तस्यास्तज्जातीयविषयकत्वात्। तदेवौषधं मया भुक्तमित्यादौ प्रत्यभिज्ञायास्तज्जातीय(विषय)त्वदर्शनादिति संक्षेपः॥

इति गुणपदार्थनिरूपणम्।

---

अथ कर्मनिरूपणम्।

अथ कर्मपदार्थो निरूप्यते। कर्मत्वजातिमत् कर्म। यद्वा संयोगविभागोभयासमवायिकारणत्वं तल्लक्षणम्। तथाहि—प्रथमं द्रव्ये कर्म, ततो विभागः, विभागात् पूर्वसंयोगनाशः, तत उत्तरदेशसंयोग इति संयोगविभागयोः कर्मैवासमवायिका-

---

१ 'ज्ञानात्तु' घ पाठ

रणमिति लक्ष्ये लक्षणसमन्वयः । अत्रैकैकासमवायिकारणत्वस्य तल्लक्षणत्वे संयोगविभागयोरतिव्याप्तिः, तयोरपि संयोगजविभागजसंयोगविभागौ प्रति असमवायिकारणत्वात् । अतः समुदितमुपात्तम् । यद्वा विभागासमवायिकारणत्वे सति संयोगकारणत्वं तत् । न च विभागेऽतिव्याप्तिः, तस्य विभागजविभागं प्रत्यसमवायिकारणत्वात् पूर्वसंयोगनाशद्वारा संयोगजनकत्वाच्चेति वाच्यम् । तस्य पूर्वसंयोगध्वंसेनान्यथासिद्धतया संयोगजनकत्वाभावात् । न चाजनितसंयोगविभागे कर्मण्यव्याप्तिः । तत्रापि स्वरूपयोग्यतालक्षणकारणत्वसत्त्वात् । न च तादृशकर्मणि मानाभाव इति शङ्क्यम् । तस्यापि क्वचित् सम्भवात् । तथाहि—चलत्यवयविनि नावयवा निश्चला उपलभ्यन्ते । अतोऽवयविनि कर्मोत्पत्तिकालेऽवयवेष्वपि कर्मोत्पत्तिरावश्यिका । अवयविकर्मणो यावदवयवकर्मोत्पत्तिनियतत्वादिति वैशेषिकवृद्धाः । यावदवयवकर्मव्याप्यतेति तदेकदेशिनः । इदमेव भाष्यकारादीनां सम्मतम् । अत एव विभागग्रन्थे 'तेनांशेन कर्मोत्पत्त्यनन्तरं तदारब्धे तन्तौ कर्मोत्पद्यते' इत्यभिहितम् । तन्तुकर्मनाशक्षणे सामग्रीबलादायातायाः पटे कर्मोत्पत्तेर्वारयितुमशक्यतया मतद्वयमप्यसङ्गतम् । न च तदापि तन्तौ कर्मोत्पादः सम्भवति, तत्प्रतिबन्धकस्य कर्मणः सत्त्वादिति नैयायिकाः । तथा च तन्नाद्यमते यत्रावयविनि क्रिया तत्र स्वसमानकालोत्पन्नावयवक्रियया-

१. 'णसत्त्वे' ख. पाठः. २. 'गवि' ग. पाठः. ३. 'टे' क. पाठः. ४. [illegible] पाठः.

वयविनाशानुकूलया विभागादिक्रमेणोत्तरदेशसंयोगकाले आश्रयस्यावयविनो नाशान्नावयविक्रियया संयोगो जनयितुं शक्यते। अतः सा क्रियाजनितसंयोगेति युक्तम् । अन्तिममतद्वये त्ववयविनाशसामग्रीकाले जातस्यावयविकर्मणो द्विक्षणावस्थायिनोऽजनितसंयोगविभागत्वं स्फुटम् । एवं द्रव्यनाशसामग्रीपूर्वकालोत्पन्नावयविकर्मणः क्षणत्रयावस्थायिनो द्रव्यनाशसामग्रीकाले जनितविभागत्वेऽपि तदुत्तरकाले द्रव्यनाशेन संयोगजननासम्भवादजनितसंयोगत्वं द्रष्टव्यम् । एतादृशस्थलाभिप्रायः प्राचां कर्मणः क्षणत्रयस्थायित्वप्रवादः । प्रायशः कर्मणः क्षणचतुष्टयस्थायित्वमेव, उत्तरसंयोगेन तन्नाशाभ्युपगमात् । द्विक्षणस्थायित्वमप्यनुपदमेव व्युदपादि । आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकस्य तु पञ्चक्षणस्थायित्वं विभागजविभागावसरे व्यक्तीकृतम् । दीधितिकृतस्तु — प्रकारान्तरेणापि पञ्चादिक्षणस्थायित्वं वर्णयन्ति । तदतिदुरूहं व्युत्पित्सूनामिति नात्रोच्यत इति संक्षेपः । नैयायिकास्तु — आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकस्यापि कर्मणः कर्मान्तरवच्चतुःक्षणस्थायित्वमेव । यत्र कपाले घटनाशानुकूला क्रिया, तया कपालद्वयविभागः, ततः कपालाकाशविभागः, ततः कपालाकाशसंयोगनाशः, ततः कपालोत्तरदेशसंयोगः, ततः कर्मनाश इति पञ्चक्षणस्थायित्वं प्रागुक्तम् । तदयुक्तम् । तया कपालक्रियया कपालद्वयविभागकाले कपालाकाशविभागस्याप्युत्पादसम्भवाद्, एकस्य कर्मण आरम्भकसंयोगविरोध्यवि-

१. 'प्रायशः' ग पाठ  २. 'प्यविभा' ग पाठ ।

रीधायभागजनकत्वे विरोधाभावात् । न चैवं विकसत्कमलमुकुलभङ्गापत्तिरिति वाच्यम् । संयोगस्याव्याप्यवृत्तितया यदवच्छेदेन कमलारम्भकसंयोगस्तदवच्छेदेन कर्मण एव तद्विरोधिविभागजनकत्वेनोक्तस्थले तदभावेन मुकुलभङ्गाप्रसक्तेरिति[1] वदन्तीति दिक् । तच्च कर्म व्याप्यवृत्तीति प्राञ्चः । नवीनास्तु—कर्माप्यव्याप्यवृत्ति, शाखायां वृक्षश्चलति न मूल इति प्रतीतेरिति संक्षेपः ॥

इति कर्मपदार्थनिरूपणम् ।

---

अथ सामान्यादिनिरूपणम् ।

सामान्यविशेषसमवायाभावानां विभागावसर एव प्रतिपादनेन तत्रात्यन्तवक्तव्याभावान्न तेषामिह[2] पुनः प्रतिपादनमिति सिद्धं सप्तैव पदार्था इति । नन्विदमनुपपन्नं, शक्तिसादृश्यादीनां पदार्थान्तराणामपि सत्त्वात् । तथाहि—यादृशादेव करतलानलसंयोगाद् दाहो दृष्टः, तादृशादेव मणिमन्त्रादिसमवहिताद् दाहो न जन्यत इति निर्विवादम् । ततस्तत्र वह्नौ दाहानुकूला शक्तिर्मणिमन्त्रादिसमवधाननाश्या तदसमवधानेन च जन्यत

१. 'फि' ग. पाठ. २. 'इ प्र' ग. पाठः.

इति कल्प्यते । सा च न द्रव्यादिषडन्तर्गतेत्यतिरिक्तत्वसिद्धिः । एवं सादृश्यमपि न द्रव्यादिपडन्तर्गतं, सामान्यवृत्तित्वाद्, अभाववत्। न च हेतोरसिद्धिः। यथा घटत्वं नित्यं तथा पटत्वमपीति प्रतीत्या तस्य सामान्येऽपि सत्त्वात्। नाप्यभावः। विधिमुखेन प्रतीयमानत्वात् । मैवम् । मणिमन्त्राद्यभावस्योभयसम्प्रतिपन्नस्यैव दाहजनकत्वाङ्गीकारेण तत्र दाहकारणोपपत्तावतिरिक्तानन्तशक्तितत्प्रागभावध्वंसकल्पनाया गौरवपराहतत्वादित्यास्तां विस्तरः। एवं सादृश्यमपि न पदार्थान्तरम्। तत्र प्रमाणाभावात् । उक्तहेतोर्वस्तुत्वप्रमेयत्वादौ व्यभिचारात् । किन्तु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम् । यथा चन्द्रभिन्नत्वे सति चन्द्रगतकान्त्यादिमत्त्वमेव मुखे चन्द्रसादृश्यमिति । स च धर्मो द्रव्यगुणादिरूप इति दिक् । दीधितिकारास्तु — शक्तिसङ्ख्याक्षणकारणत्वकार्यत्वविषयत्वविशेषणत्वादीनतिरिक्तानेव पदार्थानभ्युपगच्छन्ति। यथा चैतत् तथा पदार्थखण्डनादौ सुव्यक्तमिति विस्तरभीतेर्नेह प्रतन्यत इति सर्वमनवद्यम् ॥

वटस्य पत्रे मूले च स्थितिर्येषां विकल्प्यते ।
सूरिभिस्तान् गुरून् वन्दे विश्वरूपेन्द्रयोगिनः ॥ १ ॥

तत्कृपापाङ्गनिर्धूतजडिमाखिलशास्त्रवित् ।
सिद्धान्तचन्द्रिकामेतां गङ्गाधरसुधीर्व्यधात् ॥ २ ॥

---

१ 'समवेतान्त' ग पाठ  २ 'सादृश्यञ्च' ख. पाठ  ३. 'था न चै' ग पाठ.

अनया विशदीभूते न्यायवैशेषिकाध्वनि ।
निर्विशङ्कं सञ्चरन्तु बाला व्युत्पत्तिकाङ्क्षिणः ॥ ३ ॥

इति श्रीसकलविद्यानिधानगङ्गाधरसूरिविरचिता
काणादसिद्धान्तचन्द्रिका
समाप्ता ।

---

वन्दारुजनमन्दार वारिजासनपूजितम् ।
गङ्गाधरं ललाटाक्ष भजे मध्यार्जुनेश्वरम् ॥
गङ्गाधराख्यमखिना बालव्युत्पत्तये कृता ।
समाप्तिमधुना याता तर्कसिद्धान्तचन्द्रिका ॥

शुभं भूयात् ।

---